THE

PRINCESS OF WALES

SARASWATĪ BHAVANA TEXTS

*No. 45*

( PART I )

—o—

EDITED BY

GOPI NĀTH KAVIRAJ, M. A.

---

THE

# KIRAṆĀVALĪ PRĀKAS'A

( PART I )

*Printed by Jai Krishna Das Gupta*
*Vidya Vilas Press, Benares City.*

---

1933

Saleable at half of the printed price.

# किरणावलीप्रकाशः

लक्ष्मणपुरविश्वविद्यालयस्य न्यायवेदान्तादिशास्त्राध्यापकेन
'एम. ए.' इत्युपाधिधारिणा 'न्यायशास्त्रि'-
पदवीसमलङ्कृतेन श्रीबदरीनाथ-
शर्म्मणा संशोधितः ।

THE

# KIRAṆĀVALĪ PRĀKAS'A

By

VARDHAMĀNA UPĀDHYĀYA

( PART I )

EDITED BY

PANDIT BADRI NATHA S'ĀSTRI, M. A.,
Lecturer in Sanskrit, Lucknow
University Lucknow.

1933.

# FOREWORD.

The reputation of Vardhamāna Upadhyaya as a commentator on Udayana Āchārya's philosophical works is universally recognised in the circle of teachers of early Nyāya and Vaiśeṣika systems. Udayana's Kiraṇāvalī, which is the most learned and yet popular exposition of the Padārthadharma Saṇgraha of Praśastapādāchārya is one of the most important works belonging to the Vaiśeṣika School. Padmanābha Miśra's commentary on the Dravya Section of the work, entitled Kiraṇāvalībhāskara, and Vādīndra's commentary on the Guṇa Section, have already appeared in this series ( Nos. 1 and 5 ). The following pages by Vardhamāna, embody another commentary on the Guṇa section. It is hoped that in view of the importance of the original work and the intrinsic merit of Vardhamāna's annotations no apology is needed for bringing out the present edition.

The text of the Commentary will be completed in the second part, which will contain the general Introduction to the edition embodying the editor's notes on the author, his time and his literary productions.

Government Sanskrit College,
Benares } Gopinath Kaviraj.

# किरणावलीप्रकाशः ।

## गुणनिरूपणम् ।

एकत्र संनिपतितासितकण्ठबिम्ब-
मन्यत्र चन्द्रकिरणाहितशुभ्रभावम् ।
सन्ध्याजलाञ्जलिमनङ्गरिपोर्नमामि
हस्तप्रविष्टमिव पुण्यतमं प्रयागम् ॥ १ ॥

नतिवन्नुतेरपि प्रारिप्सितविघ्नविघातकत्वात्तामादौ कृतां निबध्नाति तुष्टेरिति । तुष्टिः अनुरक्तिः, अतुष्टिः द्वेषः, तदुभयमपि मोचनीययोरीश्वरविषयकमेव । 'परात्परतरं यान्ति नारायणपरायणाः । न ते तत्र गमिष्यन्ति ये द्विषन्ति महेश्वरम्' इति स्मृतेः । यद्वा मोचनेच्छाबन्धनेच्छे तुष्ट्यतुष्टी ईश्वरस्यैव । तदिच्छाया एकत्वेऽपि तत्तत्फलोपधानात् सिसृक्षासञ्जिहीर्षावदौपचारिको भेदः, सहकारिभेदसमवधानात् तस्याः कार्यभेदजनकत्वाच्च । अत्र बध्नतः पुनरित्यनेन बन्धस्यावृत्त्या मोक्षानन्तरं बन्ध इत्यर्थे विरोधादतुष्टः पुनरिति योजना । तथाच व्यवच्छेदार्थः पुनःशब्दो नावृत्त्यर्थ इति नोक्तदोषः । यद्वा बध्नतः पुनरित्यनेन बन्धस्य निरन्तरावृत्तिरुच्यते न मोक्षोत्तरेति नोक्तदोषः । मुक्तिबन्धौ दुःखसंतत्यत्यन्तोच्छेदतदनुवृत्ती तयोश्च शरीरावच्छेद्यत्वात् । विश्वपदेन भोगायतनं शरीरमेव कारागारत्वेन निरू-

प्यते । न च तयोः सादृश्यप्रतिपादनार्थं तयोरेव विशेषणं युक्तम् । (१)अन्यत्र हि कारागृहे प्रभोरेव तोषातोषाभ्यां मोक्षबन्धदर्शनात्प्रकृतेऽपीश्वरव्यापारायत्तत्वात्तत्साम्याय तद्विशेषणस्यैवोचितत्वात् ।

"कारो वधे निश्चये च बलौ यत्ने पशावपि ।
तुषारशैले च पुमान् स्त्रियां भूतिप्रसेवके ।
सुवर्णकारिकायां च बन्धनागारबन्धयोः ।" इति मेदिनीकारः।

अतः(२) कारा बन्धनं तदर्थं गृहं कारागृहं यथा "कारागृहे निर्जितवासवेन" इत्यत्र । कारारूपं गृहं कारागृहम् । विशेषमुपादाय (३)सामान्यपदोपादानं विशेषगतातिशयं प्रतिपादयतीति व्युत्पत्तेरत्रापि विशेषप्रतिपत्तये गृहपदमित्यन्ये ।

अत्र द्रव्ये धर्मिणि निरूपिते धर्मा रूपादयो निरूप्यन्त इति द्रव्यगुणनिरूपणयोर्हेतुहेतुमद्भावं दर्शयितुं वृत्तवर्तिष्यमाणे कीर्तयति–साधर्म्येति । यद्वा प्रतिबन्धकप्रधानीभूतद्रव्यतत्त्व(४)जिज्ञासानिवृत्तिकथनेनावसरलक्षणैव संगतिरनेनोक्ता । प्रकारे तृतीया । निरूपणं तु(५) सजातीयविजातीयव्यावृत्तत्वेन ज्ञानम् । ननु गुणानामित्यत एव रूपादिमात्रप्राप्तौ रूपादीनामिति व्य-

(१) उचितम्—इति (क) पुस्तके ।
(२) मेदिनीकारकोषात्—इति (क) पुस्तके ।
(३) च—इति (क) पुस्तकेऽधिकम् ।
(४) निरूपण—इति (क) पुस्तकेऽधिकम् ।
(५) च इति (क) पुस्तके ।



र्थमित्यत आह—गुणशब्देनेति । ननु गुणशब्दवद्रूपादिशब्दसर्वशब्दौ नानार्थौ ततोऽपि कथं शङ्कापनयः । न च प्रकरणसाचिव्यात् तथा । गुणपदमात्रो(१)पादानेऽपि तत्सम्भवात् । न च रूपादीत्यादिशब्दो व्यवस्थावाची व्यवस्था च वैशेषिकप्रसिद्धेति रूपादिपदं चतुर्विंशतिगुणपरमिति युक्तम् । तथापि गुणपद(२) वैयर्थ्यापत्तेः । न चादिपदस्य व्यवस्थावाचित्वं गुणपदसमभिव्याहारादेवेति वाच्यम् । एकपदेनैव तदुपदर्शनसंभवेनेतरपदस्य वैयर्थ्यापत्तेः ।

अत्राहुः । रूपादिपदं चतुर्विंशतिमात्रपरं रूपत्वादीनां जातिरूपतया शीघ्रोपस्थितिकत्वात्(३) उपाधेश्च विलम्बो(४)पस्थितिकत्वात् । एतच्छास्त्रप्रसिद्धेर्वा । गुणपदं चाप्राधान्यार्थम्(५) । अप्राधान्यं च द्रव्यापेक्षया (६)रूपादीनां द्रव्यधर्मत्वेनाप्रधानत्वात् द्रव्यस्य च धर्मितया प्रधानत्वात् । तदुपदर्शनं च धर्मिनिरूपणं धर्मनिरूपणहेतुरिति संगतिप्रदर्शनपरम् ।

तथापि रूपत्वरसत्वादिनोपस्थिते धर्मिणि प्रत्येकमन्वये

(१) मात्रपदो—इति (क) पुस्तके ।
(२) पदस्य—इति (क) (ख) पुस्तकयोः।
(३) उपस्थितत्वात्—इति (क) पुस्तके।
(४) विलम्बितो—इति (क) पुस्तके ।
(५) अप्रधानार्थम्—इति (क) पुस्तके ।
(६) द्रव्यापेक्षम्—इति (क) पुस्तके ।

वाक्यभेदापत्तिः । अथ गुणत्वेनोपस्थितिस्तदा(१) तत्र(२) गुणत्वविधानादुद्देश्यविधेयतावच्छेदकप्रकारयोरभेदानुपपत्तिः ।

मैवम् । गुणत्वसंबन्धस्य तल्लक्षणत्वस्य वा विधेयत्वात् । यद्वा । रूपादिपदगुणपदयोरुभयोरपि चतुर्विंशतिपरत्वे रूपादीनां गुणत्वाभिसंबन्धो गुणानां द्रव्याश्रितत्वमिति प्रत्येकमनादृत्यैवान्वयः । अग्रे तु रूपादीनां निष्क्रियत्वं गुणानामगुणत्वमित्येकावृत्त्यैवान्वयः अन्यथा त्वनेकावृत्तिकल्पना स्यात् ।

तथापीति । ननु रूपादीनां गुणत्वसम्बन्धे विहिते संकोचकाभावात् सर्वेषामिति प्राप्यत एवेति सर्वेषामिति व्यर्थम् ।

अत्राहुः । यद्रूपावच्छिन्ने गुणत्वसंबन्धो विधीयते तद्रूपसामानाधिकरण्यमात्रेणापि तत्पर्यवसानात्तद्रूपव्यापकत्वं गुणत्वसंबन्धस्य न प्राप्तमिति तद्बोधनार्थं सर्वपदम् ।

यद्वा । कपिञ्जलन्याया(३)द्बहुवचनं न त्रित्वमात्रपरमिति बोधनार्थं सर्वेषामित्युक्तम् ।

सामान्यविशेषो रूपादिचतुर्विंशतिमात्रवृत्तिजातिविशेषः । नन्वभिसबन्ध इत्यत्राभिपदं व्यर्थम् अभेः(४)सर्वपदेनैव दर्शितत्वादित्यत आह—**अभिमत इति** । एकार्थसमवायित्वेना-

(१) तदा—इति (ख) पुस्तके नास्ति ।
(२) तत्र—इति (क) पुस्तके नास्ति ।
(३) न्यायेन—इति (क) पुस्तके ।
(४) अभिव्याप्तेः—इति (क) (ख) पुस्तकयोः ।



भिमत(१) इत्यर्थः । नेनेति । तच्छब्देन गुणत्वमात्रं परामृश्यते न तु समवायोऽपि । तावन्मात्रस्यैव गमकत्वे तस्य व्यर्थत्वात् । न चैवं समवायपदवैयर्थ्यम्(२) । समवायेन सबन्धेन गुणत्वं(३) हेतुरित्युपदर्शनार्थत्वात् । उक्तमिति । केवलव्यतिरेकानुमानरूपमित्यर्थः । गुणत्वमिति ।

नन्वत्रानुमानपरतायामाश्रयासिद्धिः सिद्धौ वा बाधः साध्यसाधनविकलश्च दृष्टान्तः, अत एव नानुपलम्भमात्रपरत्वमपि ।

मैवम् । गुणत्वं तावदुभयसिद्धम् । तज्जातिरुपाधिर्वेति विवादः । तत्र गुणत्वं न जातिः अनुगतत्वेनाप्रत्यक्षत्वात् व्यतिरेके(४) गोत्वादिवदित्यर्थात् ।

रूपं न रूपत्वतद्व्याप्यभिन्नसत्ताव्याप्यजातिमत् तत्त्वेनाप्रतीयमानत्वात् गोत्वादिवदित्यन्ये ।

तन्न । गुणत्ववत् सत्तारूपत्वादिजातिरपि तैरनङ्गीकृतेति तदसिद्धेस्तादवस्थ्यात् ।

व्यवस्थापकेति । ननु व्यवस्थापकं व्यञ्जकं तस्य चाननुगमेऽपि गोत्वादिजातिसत्त्वान्नानुगतो व्यञ्जको जातिव्यवस्थापकः । प्रत्युत व्यञ्जकस्यानुगतत्वे(५) जातिरेव न सिध्येत् तत

(१) समवायादिस्त्वनभिमत—इति (क) (ख) पुस्तकयोः ।
(२) समवायादिपदं व्यर्थम्—इति (क) पुस्तके ।
(३) हि—इति (ख) पुस्तकेऽधिकम् ।
(४) व्यतिरेकेण—इति (क) पुस्तके ।
(५) व्यञ्जकानुगमे—इति (क) पुस्तके ।

एवानुगतबुद्ध्यापत्तेः(१) । अननुगतं च व्यञ्जकं रूपत्वादि प्रकृतेऽस्त्येव ।

अत्राहुः । गुणत्वे व्यञ्जकं भवदननुगतमनुगतं वा जातिसमनियतं स्यात् । आद्ये गुणत्वमसिद्धमित्युक्तम् । व्यञ्जकाननुगमेऽपि गोत्वमनुगतप्रतीत्या सिध्यति । रूपादिषु गुणत्वप्रकारिका जातिविषयानुगतधीर्नास्तीत्यर्थः । अन्त्ये व्यवस्थापकाभावादिति । कर्मव्यावृत्तस्यानुगतस्य व्यञ्जकस्याभावादित्यर्थः। गुणत्वे प्रत्यक्षं वा मानम्(२) अनुमानं वा । आद्ये गुणत्वमसिद्धमित्युक्तम् । गोत्वादिवदिति व्यतिरेकदृष्टान्तः । यथा गोत्व(३)मनुगताकाराध्यक्षसिद्धं न तथा गुणत्वमित्यर्थः। अन्त्ये व्यवस्थापकाभावादित्यन्ये ।

पूर्वं गुणत्वे बाधकमुक्तम् इदानीं साधकमपि नास्तीत्युच्यते इत्यपरे । इतरेतराश्रयेति । वस्तुतः कर्मण्यतिव्याप्तत्वान्नेदं गुणत्वसमनियतं व्यञ्जकम् । अत एव सामान्यवान् संयोगानाश्रय इत्यपि । इतरेतराश्रयाभावेऽपि कर्मण्यतिव्याप्तमिति भावः ।

अतिव्यापकमिति । लक्षणपक्षे दूषणमिदम् । यदा तु रूपादौ रूपत्वादितद्व्याप्येतरसत्ताव्याप्यजातिमत्त्वे साध्ये तल्लिङ्गं तदा तत्र स्पर्शरहितत्वं व्यर्थं विशेषणम् । सामान्यवत्त्वमात्रं

(१) बुद्ध्युपपत्तेः--इति ( क ) पुस्तके ।

(२) स्यात् इति (क) पुस्तकेऽधिकम् ।

(३) गोत्वादिक—इति ( क ) पुस्तके ।



तु विपक्ष(१)बाधकाभावादप्रयोजकम् । अन्यथा कर्मण्यपि तत एव कर्मत्वतद्व्याप्येतरसत्ताव्याप्यजातिमत्त्वं स्यात् । न च द्रव्यावृत्तितज्जातिसिद्धौ तदुपयोगः । तथापि कर्मावृत्तितायास्तत्रासिद्धेरिति दूषणं द्रष्टव्यम् । न च कर्मान्यत्वेन लक्षणविशेषणान्नैष दोष इत्यत आह—कर्मान्यत्वे सतीति ।

ननु नैतत्प्रक्रियामात्रं कर्मान्यत्वे सतीत्यकृते कर्मण्यतिव्याप्तेः । रूपान्यत्वे रसान्यत्वे सतीत्यत्र च रूपरसा(२)दावव्याप्तेः । अथान्योन्याभावोऽनुयोगितावच्छेदकरूपेणानुयोग्युपस्थितौ प्रतीयते, प्रतियोग्यवृत्तिश्च धर्मोऽनुयोगितावच्छेदकः, अत्र चानुयोगितावच्छेदकं नास्ति, न च(३) रूपत्वादिजातिस्तथा, तदसिद्धेः । तन्न । जात्यभावेऽपि चक्षुर्मात्रग्राह्यगुणत्वाद्युपाधीनामेव तथात्वात् । कर्मणो विपक्षत्वनिश्चय एव कर्मान्यत्वं विशेषणम् । अत्र(४) स नास्तीति चेन्न । कर्मावृत्तिव्यवस्थापकत्वेन रूपादौ कर्मव्यावृत्त(५)जातिसिद्धौ तन्निश्चयात् । न च सामान्यवत्त्वकार्यानाश्रयत्वमात्रस्य जातिव्यवस्थापकत्वे कर्मसाधारणी जातिः सिध्यतीति (६)कर्मणो विपक्षत्वानिश्चयः । न हि

(१) विपक्षे--इति (ख) पुस्तके ।

(२) रूपादा--इति [क] पुस्तके ।

(३) च--इति ( क ) पुस्तक नास्ति ।

(४) तु—इति (क) पुस्तकेऽधिकम् ।

(५) कर्मावृत्ति—इति (क) पुस्तके ।

(६) सिद्ध्येदिति--(क) पुस्तके ।

निमित्तान्तरेण रूपादौ कर्मसाधारणजात्यन्तरासिद्धिरुक्तव्यवस्थापकबलेन कर्मव्यावृत्तजातिसिद्धौ विरोधिनी । एकत्रोभयतादृशजातिसिद्धौ विरोधाभावात् ।

अत्राहुः—न धर्ममात्रं जातिव्यवस्थापकम् अपि तु जातिनियतम्, अन्यत्वं च न तथा, तथात्वे वा रूपान्यत्वेन रसादौ रसान्यत्वेन वा रूपादौ तत्कल्पनेति संकरापत्तिः । यद्वा अन्यत्वं व्यभिचारिजातीयतया व्याप्यत्वेन व्यवहारादौ न निश्चेतुं शक्यते । रूपान्यत्वादिना रसान्यत्वादिना च व्यभिचारिजातीयत्वमेव दर्शितम् ।

किमत्रेति । व्यवस्थापकेन लिङ्गेनेत्यर्थः । रत्नतत्त्वमिति । यथा रत्नतत्त्वव्याप्यजातिरिन्द्रियसंनिकर्षमात्रवेद्यापि रूपप्रभाविशेषवान् मणिः पद्मरागपदवाच्य इति जातिविशेषनियतधर्मोपदेशजसंस्कारसध्रीचीनेनेन्द्रियेणानुभूयते तथा गुणत्वसामान्यमपि सामान्यवान् कार्यानाश्रयः कर्मान्यो गुणपदवाच्य इत्युपदेशजसंस्कारसहकृतेन्द्रियवेद्यमित्यर्थः ।

निमित्तमिति । सामान्यनियतधर्मान्तर्भावेनोपदेशे जातिग्राहको न च प्रकृते सोऽस्तीत्यर्थः ।

ननूक्तोपाधिरूपमेव सामान्यमादायोपदेशः प्रत्यक्षेण जातिग्रहे सहकारी स्यात् । न वा सामान्यनियत(१)धर्मोपदेशः प्रत्यक्षसहकारीति नियमः । अनतिप्रसक्तधर्मोपदेशस्यैव तत्सहकारि-

(१) नियत एव—इति ( क ) पुस्तके ।



त्वसंभवात् लाघवाच्च । अथाध्यक्षज्ञाने जनयितव्ये नेन्द्रियाणां शब्दः सहकारी साक्षात्त्वशाब्दत्वजात्योः संकरापत्तेः । किन्तु शाब्दं ज्ञानमिन्द्रियसहकारि धर्मविशेषज्ञानव्यङ्ग्यत्वाद्रत्नजातिविशेषाणाम् । शब्दस्यापि परिचायकधर्मोपदर्शनद्वारा सहकारित्वं वाच्यम् । तथा च धर्मविशेषज्ञानमेवेन्द्रियसहकार्यस्तु ।

तन्न । प्रकृते(१) गुणत्वप्रतीताविन्द्रियाणामुक्तव्यवस्थापकज्ञानस्यैवेन्द्रियसहकारित्वापत्तेः ।

वस्तुतो रत्नगत(२)जातिविशेषज्ञानेऽपि नोपदेशस्येन्द्रियसहकारित्वम् । उपदेशं विनाप्यनुगतमतेर्जातिविषयायाः सत्त्वात् । उपदेशस्य तु जातिविशिष्टस्य शब्दविशेषवाच्यताप्रतिपादनेनो(३)पयोगित्वं प्रथममनेकधर्मदर्शने किंधर्मविशिष्टो धर्मी शब्दविशेषवाच्य इति परिच्छेत्तुमशक्यत्वात् । तदिहापि कर्मान्यत्वाद्युपाधिना व्यावृत्तो धर्मी गुणपदवाच्य इत्युपदेशजज्ञानसापेक्षमिन्द्रियं गुणत्वं गमयिष्यति ।

अत्राहुः—रत्नविशेषेऽनतिप्रसक्तो धर्मविशेषो रूपादिविशेष एव वाच्यः, तस्य च कार्यस्य कारणतावच्छेदकः(४) सामान्यविशेषोऽवश्यं वाच्यः, स च योग्यव्यक्तिवृत्तितया प्रत्यक्षः । गुणत्वे तु प्रमाणान्तरानवतारदशायामुक्तव्यवस्थापकेनो-

(१) प्रकृतेऽपि—इति ( क ) पुस्तके ।

(२) गत—इति ( क ) पुस्तके नास्ति ।

(३) प्रतिपादनो—इति (क) पुस्तके ।

(४) कार्यकारणतावच्छेदकः—इति ( क ) पुस्तके ।

पदेशेन वा विप्रतिपन्नं प्रति प्रत्यक्षमसिद्धं सिद्धौ वा रसादावपि रूपान्यत्वोपाधिसहकारेण सामान्यमेकं प्रत्यक्षं सिध्येत् । न चैतच्छास्त्रं रत्नशास्त्रवदागमतया गुणत्वे मानम् । युक्तिप्रणयनवैयर्थ्यात् । परं प्रत्याप्तोक्तत्वासिद्धेश्च प्रामाण्यासिद्धौ चागममात्रं न प्रत्यक्षसहकारि ।

**तस्मादिति** । कर्मव्यावृत्तव्यवस्थापकस्योक्तस्यातिप्रसञ्जकत्वात्सामान्यवत्त्वकार्यानाश्रयत्वमात्रेण जातिसिद्धौ च(१) कर्मसाधारण्यमित्यर्थः ।

**तस्मादिति** । स्वोत्पत्त्युत्तरकालभाविभावभूतानपेक्षत्वमात्रमत्रानपेक्षत्वं विवक्षितम् । तेन कर्मणो द्रव्यपूर्वदेशसंयोगनाशापेक्षित्वेऽपि नासिद्धिः ।

नन्वेकजातीयकार्यकारित्वेनैकजातीयत्वं साध्यते कर्मविलक्षणकार्यकारित्वेन विजातीयत्वं वा ?

नाद्यः, व्यभिचारात् द्रव्यकर्मणोस्तथात्वेऽप्यतथात्वात् सत्तया सिद्धसाधनाच्च ।

द्वितीये चाप्रकृतत्वम्,(२) एकजातीयत्वासिद्धेः । अपि च परस्परविरुद्धसंयोगविभागरूपकार्यकारित्वमसमवायिकारणत्वमत्राभिमतं कारणत्वमात्रं वा । नाद्यः । अकर्मत्वेनैव तदभावसम्भवात् । न हि द्रव्ये संयोगविभागोभयासमवायिकारणत्वमस्ति ।

---

(१) च—इति ( क ) पुस्तके नास्ति ।
(२) अप्रयोजकत्वम्—इति (ख) पुस्तके ।



नान्त्यः, धर्मादौ परमेश्वरज्ञानादौ च विरुद्धकार्यकारितया गुणत्वाभावापत्तेः। किञ्च विरुद्धकार्यान्यकार्यजनकत्वं(१) रूपादौ कर्मव्यावृत्तजातिव्यवस्थापकं(२) विरुद्धकार्याजनकत्वं(३) वा । आद्ये यदि जनकत्वमात्रेण तदा द्रव्यकर्मसाधारणी जातिः स्यात् असमवायिकारणत्वेऽपि(४) कर्मसाधारणी स्यात् अदृष्टज्ञानसाधारणी च न स्यात् । अन्त्ये सामान्यादिसाधारण्यम् । न च सामान्यवत्त्वेन विशेष्यम्(५) । अदृष्टेश्वरज्ञानादौ गुणत्वासिद्धिप्रसङ्गात् । न च विरुद्धकार्यासमवायिकारणत्वव्यतिरेको विवक्षितः । द्रव्यसाधारण्यापत्तेः ।

अत्राहुः—रूपादौ संयोगविभागसमवायिकारणत्वासमवायिकारणत्वशून्ये जातिमति यत्कारणत्वं तन्न रूपत्वाद्यवच्छेद्यं मिथो व्यभिचारात् सत्तायाश्चातिप्रसक्तत्वा(६)दित्यनुगतधर्मावच्छेद्यं तदेव गुणत्वम् । न चैवं तद्विलक्षणकारतणया द्रव्यकर्मसाधारणी जातिः सिध्येत् । संयोगविभागसमवायिकारणत्वेन द्रव्यत्वस्य तदुभयासमवायिकारणत्वेन च कर्मत्वस्य सिद्धावविरोधात् ।

---

(१) विरुद्धकार्याजनकत्वम्—इति (क) पुस्तके ।
(२) साधकं—इति (क) पुस्तके ।
(३) विरुद्धकार्यातिरिक्तकार्यजनकत्वं-इति (क) पुस्तके ।
(४) असमवायिकारणत्वेन तु—इति (क) पुस्तके ।
(५) तद्विशेष्यम्-इति (क) पुस्तके ।
(६) अतिप्रसञ्जकत्वात्—इति (क) पुस्तके नास्ति ।

यद्वा—रूपादयो रूपत्वादिभिन्नसत्ताव्याप्यजातिमन्तः सामान्यवत्त्वात् कर्मवत् । न च रूपाद्यवृत्तिजातिमत्त्वमुपाधिः । साध्यव्यापकताग्राहकमानाभावात् । अत एव न कर्मत्वमुपाधिः । द्रव्ये साध्याव्यापकत्वाच्च । न चैवं द्रव्यमात्रे द्रव्यगुणयोर्वा द्रव्यत्वादि(१)तद्व्याप्यान्यसत्ताव्याप्यसामान्यवत्त्वमपि सामान्यवत्त्वादनुमीयेतेति वाच्यम्(२) । विपक्षे बाधकाभावात् । प्रकृते च तादृशकार्यस्याकस्मिकतापत्तेरेव(३) विपक्षबाधकत्वात् ।

यद्वा—रूपत्वं सत्ताव्याप्यजातिव्याप्यं रूपमात्रवृत्तिजातित्वात् शुक्लत्ववत् । न च रूपत्वव्याप्यत्वमुपाधिः । पृथिवीत्वादौ साध्याव्यापकत्वात् निमित्तकारणतातिरिक्ता या(४) संयोगविभागोभय(५)कारणता तद्विरोधिनी सामान्यसमानाधिकरणा या कारणता सा गुणत्वव्यवस्थापिका । द्रव्ये हि तादृशकारणताविरोधिनी कारणता क्वचित् द्रव्यस्य तन्निमित्तकारणत्वेन समावेशात् । सामान्यस्य तु तादृश्यपि कारणता न सामान्यसमानाधिकरणा । न च निमित्तकारणत्वातिरिक्तत्वेन रूपेण यत्तौ प्रति कारणत्वं तेन द्रव्यकर्मसाधारणी जातिः स्यात् । तौ प्रति कारणान्तरसाधारणं यदसमवायिकारणत्वं तस्य जातिव्यवस्थापक-

(१) आदि—इति (क) पुस्तके नास्ति ।

(२) जातिमत्त्वमपि जातिमत्त्वादनुमीयेत—इति (क) पुस्तके ।

(३) जातिकार्यस्याकस्मिकत्वप्रसक्तेरेव—इति (क) पुस्तके ।

(४) निमित्तकारणतातिरिक्तेन रूपेण—इति (क) पुस्तक ।

(५) संयोगविभागौ प्रति—इति (क) पुस्तके ।



त्वात् । अन्यथा तौ प्रति समवायिकारणत्वातिरिक्तं यत्कारणत्वं तेन संयोगमन्तर्भाव्य जातिसिद्धौ सांकर्य(१) स्यात् । विभागपूर्वकसंयोगासाधारणकारणत्वाभावश्च गुणत्वव्यञ्जकः । तेन संयोगादृष्टेश्वरज्ञानानामुभय(२)जनकत्वेऽपि न तत्र गुणत्वाभावः ।

स्वोक्ते सूत्रकारसंमति(३)माह—**सोऽयमिति** । द्रव्याश्रितत्वस्य द्रव्यादिपञ्चकेऽतिव्याप्तिं निराकर्तुमाह—**अनाश्रितत्वेति** । उक्तम् । साधर्म्यप्रस्तावे प्रशस्तपादाचार्येणेति शेषः । समवायवदिति व्यतिरेके दृष्टान्तः(४) । तेन यथा समवायो न वर्तते तथा गुणा न वर्तन्त इति नास्ति, यथा वा द्रव्याणि कानिचिन्न वर्तन्ते तथा केचिद्गुणा न वर्तन्ते इति नास्ति, यथा च कर्मणि विशेषाः केषुचिदेव द्रव्येषु वर्तन्ते न तथा गुणाः, यथा सामान्यमद्रव्येऽपि वर्तन्ते न तथा गुणाः, किन्तु पदार्थत्वावान्तरविभाजकोपाधिना सकलद्रव्यवृत्तय इत्यर्थः ।

ननु गुणरूपेणेति यदि गुणत्वं सामान्यं विवक्षितं तदा स्वरूपासिद्धिः, गुणत्वस्य द्रव्यावृत्तित्वात् । अथ गुणव्यक्तय एव विवक्षितास्तथापि स एव दोषः गुणव्यक्तीनामेकैकद्रव्यवृत्तित्वेन

(१) जातिसांकर्य—इति क पुस्तके ।

(२) ज्ञानादौ उभय—इति (क) पुस्तके ।

(३) अनुमति—इति (क) पुस्तके ।

(४) व्यतिरेकदृष्टान्तः—इति (क) पुस्तके ।

सकलद्रव्यावृत्तित्वात्(१)।

नैवम्। द्रव्यत्वावच्छिन्नव्याप्यताप्रतियोगिकव्यापकतावच्छेदकसत्तासाक्षाद्व्याप्यजातिमत्त्वस्य(२) विभुसमवेतवृत्तिसत्तासाक्षाद्व्याप्यजातिमत्त्वस्य वा विवक्षितत्वात्।

निष्क्रियत्वागुणत्वयोः कर्मादावतिव्याप्तिरिति पूर्वसाधर्म्यद्वयोपपादकतया द्वे व्याचष्टे—तदेतदिति। पूर्वसाधर्म्यद्वयमित्यर्थः। द्रव्यलक्षणेति। रूपादिभ्यो द्रव्यत्वस्य व्यावृत्त्येत्यर्थः। न हीति। रूपादिषु द्रव्यत्वे सतीत्यर्थः।

जातिसंकरेति। यद्यपि द्रव्यत्वव्याप्यत्वे गुणत्वस्य(३) न जातिसांकर्यं तथापि सर्वत्र(४)गुणेषु यद्यनित्यगुणाः स्युस्तर्ह्यनिर्मोक्षापत्तिरिति। यत्र गुणे गुणो नाङ्गीकार्यस्तत्र केवलं गुणत्वं वर्तते घटादौ च केवलं द्रव्यत्वमित्यन्यत्र तयोः संकरः स्यात्। गुणेषु गुणस्य नित्यत्वे च(५) जातित्वापत्त्या गुणत्वव्याघात इत्यर्थः। वस्तुतो गुणे द्रव्यत्वसत्त्वे तदविनाभूतसंयोगादेरप्यावश्यकत्वान्न तत्र गुणत्वं वर्तेत। संयोगाद्यसमवायिकारणतासमवायिकारणताविरोधिकारणतया(६) गुणत्वकल्पनात्।

(१) द्रव्यवृत्तित्वाभावात्—इति (क) पुस्तके।

(२) व्याप्यावान्तरजातिमत्त्वस्य—इति (क) पुस्तके।

(३) द्रव्यत्वव्याप्यगुणत्वे— (क) पुस्तके।

(४) सर्वत्र—इति (क) पुस्तके नास्ति।

(५) नित्यत्वेन—इति (क) पुस्तके।

(६) संयोगादिसमवाय्यसमवायिकारणताविरोधितया—इति (क) पुस्तके।



यश्च धर्मो यत्र नास्ति तत्रापि तेन धर्मेण जातिकल्पनेऽतिप्रसङ्गः। न वा गुणेषु द्रव्यत्ववृत्तौ मानमस्ति। मानाभावेऽपि जातिकल्पने सर्वं सर्वजातीयं स्यादित्यर्थः(१)। नाप्यभिव्याप्त्येति। जातिसंकराद्गुणे गुणत्वानभ्युपगमे गुणत्वरूपेण सर्वद्रव्यवृत्तित्वं यद् द्रव्याश्रितत्वमुक्तं तदपि न स्यादित्यर्थः।

ननु निष्क्रियत्वं स्वरूपासिद्धं धात्वर्थात्मिकायाः क्रियाया गुणेष्वपि सत्त्वादित्यत आह—चलनेति। एतत् निष्क्रियत्वम्। क्रियाया इति। मूर्तत्वस्य क्रियासमवायिकारणतावच्छेदकत्वादित्यर्थः। समानदेशत्वादिति। एतत्पटाश्रित(२)तन्तुरूपं यदि मूर्तं स्यात् एतत्तन्तावेतत्पटस्य समानदेशं न स्यादिति क्रमेणापादनम्। निष्क्रियत्वं च यद्यपि निष्क्रियाविनष्टद्रव्येऽतिव्याप्तं तथापि क्रियां प्रति समवायिकारणतावच्छेदकरूपाभाववत्त्वं च साधर्म्य(३)मभिप्रेतम्।

ननु न विद्यन्ते गुणा यस्येति बहुव्रीहिणैव विवक्षितार्थलाभे नञ्तत्पुरुषान्मतुब् व्यर्थः कर्मधारयमत्वर्थीयाद्बहुव्रीहिरेवेष्टो लाघवादिति न्यायात् प्रत्युत पर्युदासनञा गुणेतरत्वं ततः(४)प्रतीयेत तच्च विवक्षितं नेत्यत आह—गुणा येष्विति। अनवस्थेति। यद्यप्यनवस्थाधर्मिणोऽग्रिमाग्रिमस्याप्रसिद्ध्या वाश्रयासिद्धिस्त-

(१) इति भावः—इति (क) पुस्तके।

(२) पटाश्रय—इति (क) पुस्तके।

(३) च साधर्म्यम्—इति (क) पुस्तके नास्ति।

(४) गुणेतरवत्त्वं—इति (क) पुस्तके।

थापि रूपादीनां रूपादिमत्त्वे रूपादिमत्त्वमेव न स्यादित्यव्यवस्थैवानवस्थार्थः । योग्यानुपलब्धिबाध इत्यपि द्रष्टव्यम् ।

गुणेष्विति । यद्यपि रूपादीनां गुणवत्त्ववादिनो द्रव्यत्वसमवायिकारणत्वे इष्टे एव, तथापि रूपादीनां द्रव्यत्वे तदविनाभूतपरिमाणमपि मन्तव्यम् । तद्यद्यवच्छिन्नं तदा मूर्तत्वं तच्च निराकृतमेव । अथानवच्छिन्नं तदा विभुत्वापत्तौ बाह्येन्द्रियाप्रत्यक्षत्वापत्तिः अकार्यत्वापत्तिश्चेति भावः । यद्वा पूर्वापरितोषेणाह–रूपावयवीति । नन्वत्रापाद्यापादकयोर्वैयधिकरण्यं रूपेष्वेव वर्तेत इति वापादकमसिद्धं घटादावपि रूपं वर्ततां रूपे च रूपान्तरमस्त्विति कथं घटादेर्नीरूपत्वं रूपस्यावयवित्वे चापादकाभावः ।

अत्राहुः––रूपं यदि कार्यं सद्रूपवत्स्यात् अवयवि स्यात्, यदि चावयवि स्याद् घटावृत्ति स्यात्; किंच रूपस्य रूपवत्त्वे घटरूपयोरुभयोरपि समवायिकारणत्वेनानुगमात् यदि रूपं समवायिकारणं तदा घटादेर्नीरूपत्वप्रसङ्गः । आदिपदग्राह्यं च रूपरसयो रूपरसवत्त्वे मूर्त्तत्वापत्तौ घटादे रसवत्त्वे नीरूपत्वप्रसङ्गः रूपवत्त्वेऽपि(१) नीरसत्वप्रसङ्ग इत्यपि(२) ।

नन्विदमसिद्धं गुणानां चलनप्रतीतेः संख्यादिगुणप्रतीतेश्चेत्यत आह––एवमिति ।

यद्यपि गौणी वृत्तिः शब्दधर्म इति शब्दप्रयोगरूपव्यवहार-

(१) रूपवत्त्वे च—इति (क) पुस्तके ।
(२) इत्यादि–इति (क) पुस्तके ।



समर्थनेऽपि प्रतीतिर्नैव(१) समर्थिता तत्र गुणवत्त्वाभावात्(२) तथापि संख्यादिप्रतीतौ साक्षात्सम्बन्धे बाधकात् परम्परासम्बन्धेनाप्युपपत्तेरन्यथासिद्धिः ।

यद्वा परम्परासम्बन्धेन दोषेण प्रतीतिरियमारोपरूपा । न चैवं शब्दे महत्तमादि(३)धीर्न स्यादाकाशमहत्त्वस्यै(४)करूपत्वेनाविशेषादिति वाच्यम् । अत एवानुपपत्तेस्तस्यास्तारतम्यादिरूपावान्तरसामान्याधीनत्वात् महत्त्वैकार्थसमवायस्यातन्त्रत्वात् ।

चशब्दसमुच्चयान्तरस्य स्वशब्देनोपात्तत्वादनुक्तसमुच्चयमाह(५)—चकारादिति । एतच्च रूपादीनां द्रव्यत्वाभावसाधनायोक्तं न तु साधर्म्यं कर्मादावतिव्याप्तेः । समवायिकारणत्वाभावमेवोपपादयति–यदा हीति । तस्यापि कार्यद्रव्यस्यापीत्यर्थः(६) । कार्यद्रव्यगुणे कारणगुणानामसमवायिकारणत्वादिति भावः । ननु मूर्तगुणत्वं संख्यादावतिव्याप्तं मूर्तमात्रगुणत्वमपि मूर्तमात्रवृत्तिसंख्यादौ गतमित्यत आह–एते मूर्ति(७)मिति । मूर्तिवृत्तितावच्छेदकगुणत्वव्याप्यजातिमन्त इत्यर्थः ।

(१) न–इति (क) पुस्तके ।
(२) गौणत्वाभावात् –इति (क) पुस्तके ।
(३) महत्तरमहत्तमादि—इति (क) पुस्तके ।
(४) आकाशरूपस्याश्रयस्य—इति (क) पुस्तके ।
(५) समुच्चयमर्थमाह—इति (क) पुस्तके ।
(६) इत्यर्थः—इति (क) पुस्तके नास्ति ।
(७) मूर्त– इति (क) पुस्तके ।

ननु सा जातिर्यदि गुणत्वसाक्षाद्व्याप्या विवक्षिता तदा वेगास्थितिस्थापकयोरव्याप्तिः तदवृत्तिसंस्कारत्वजातेरमूर्तवृत्तिभावनावृत्तित्वात्। अथ गुणत्वव्याप्यमात्रजातिर्मता तदा निबाडादि(१)संयोगभेदे परिमाणभेदे चातिव्याप्तिः। अत एव अमूर्तवृत्त्यवृत्तिगुणत्वसाक्षा(२)द्व्याप्यजातिमत्त्वमित्यपास्तम्।

मैवम्। संस्कारत्वान्यविभुगुणत्वव्याप्यजातिशून्यगुणत्वस्य भावनान्यत्वे सति कालगुणवृत्तिमूर्तगुणवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वस्य वा विवक्षितत्वात्।

वेगस्य गुणे विभागाभावादाह—वेग इति। उपलक्षणमिति। भावनातिरिक्तसंस्कारत्वेन शक्यलक्ष्यसाधारणरूपेण जहत्स्वार्थलक्षणयेत्यर्थः।

ननु चामूर्तगुणत्वं संख्यादावतिव्याप्तम् अमूर्तमात्रगुणत्वममूर्तमात्रवृत्तिसंख्यादावपि गतमित्यतआह—एते मूर्तीति। मूर्तिविरोधितावच्छेदकगुणवृत्तिजातिमन्त इत्यर्थः। ननु तत्रापि(३) जातिर्यदि गुणत्वसाक्षाद्व्याप्या मता तदा भावनायामव्याप्तिः। तद्वृत्तिसंस्कारत्वजातेर्मूर्तगुणवेगादिवृत्तेः। अथ गुणत्वव्याप्यमात्रं तदा परममहत्त्वेऽतिव्याप्तिः। अत एव मूर्तवृत्त्यवृत्तिगुणत्वव्याप्यजातिमत्त्वं तत्त्वमित्यपि हेयम्।

---

(१) निबिडत्वादि—इति (क) पुस्तके।

(२) साक्षात्—इति (क) पुस्तके नास्ति।

(३) नन्वत्रापि सा—इति (क) पुस्तके।



मैवम्। संस्कारत्वान्यमूर्तगुणवृत्तिगुणत्वव्याप्यजातिशून्यगुणत्वस्य मूर्त्यसमवायिकारण(१)विशेषगुणत्वस्य वा विवक्षितत्वात्।

ननु भावनायाः प्रयत्नविशेषतया प्रयत्नपदादेव तल्लाभ इत्यत आह--भावनेति। विशेषः स्मृतिहेतुत्वम्। ननूभयगुणत्वं मूर्तामूर्तवृत्तिगुणत्वं तच्च मूर्तमात्रवृत्ति अमूर्तमात्रवृत्तिसंख्याव्यक्तावव्याप्तम्। न च संख्याजातीये तथात्वम्। संख्याजातीयं हि न संख्याव्यक्तिः। एकस्याः संख्याव्यक्तेर्मूर्तामूर्तवृत्त्यभावात्(२)। नापि संख्यात्वं जातिः। तस्या द्रव्यावृत्तेः। न च मूर्तगुणावृत्त्यमूर्तगुणवृत्तिगुणत्वव्याप्यजातिमत्त्वम्। संस्कारेऽतिव्याप्तेरित्यत आह--द्रव्यमात्रस्येति। द्रव्यत्वावच्छिन्नव्याप्यताप्रतियोगिकव्यापकतावच्छेदकगुणत्वव्याप्यजातिमत्त्वं संस्कारत्वान्यमूर्तगुणवृत्तिविभुगुणवृत्तिगुणत्वव्याप्यजातिमत्त्वं वा विवक्षितमित्यर्थः। एकेति। यद्यपि द्विशब्देन द्वित्वाधार उच्यते तद्वृत्तित्वं रूपादावप्यस्ति। तथापि स्वाश्रयान्योन्याभावव्यापकात्यन्ताभावाप्रतियोगिगुणत्वमेकत्वान्यव्याप्यगुणत्वं वा विवक्षितम्। आदिग्रहणादिति। एकत्वान्यसंख्या एकपृथक्त्वान्यपृथक्त्वं वात्र गृह्यत इत्यर्थः। एकस्यामिति।

---

(१) मूर्त्यसमानाधिकरण—इति (क) पुस्तके।

(२) वृत्तित्वाभावात्—इति (क) पुस्तके।

यद्यप्येकत्वाश्रयवृत्तित्वं(१) द्वित्वादावपि अनेकावृत्तित्वं(२) चावृत्तावपि गतम् । तथापि स्वाश्रयान्योन्याभावव्याप्यधर्मनिरूपितवैयधिकरण्याधिकरणत्वम्(३) अन्योन्याभावव्यापकात्यन्ताभावप्रतियोगित्वं(४) स्वाश्रयान्योन्याभावात्यन्ताभावव्याप्यगुणत्वमेकैकवृत्तित्वमभिप्रेतम्(५) ।

ननु शास्त्रान्तरे(६) रूपादयो गुणाः प्रसिद्धा(७) एवेत्यत आह—**विशेषा एवेति** । विनयादिभ्यष्ठगिति स्वार्थिकः प्रत्यय इत्यर्थः । **स्वाश्रयेति** । यद्यप्येतत्संयोगभेदादावप्यस्ति तथापि पृथिवीवृत्तिवृत्तिजलवृत्तिवृत्तीतरसंयोगावृत्तिगुणत्वव्याप्यजातिमत्त्वम् । अत्र परममहत्त्वे तादृशी जातिर्नेति न तत्रातिव्याप्तिः । यद्वा परमहत्त्वावृत्तीति विशेषणं देयम् । भावनान्यत्वविशिष्टमनोवृत्तिवृत्तिगुणत्वव्याप्यजातिमत्त्वानाश्रयत्वे सति गुरुत्वपाकजद्रवत्वान्यगुणत्वं वा वैशेषिकगुणत्वं न तु द्रव्यत्वव्याप्यविभक्तोपाध्यवच्छिन्नेतरभेदप्रयोजकगुणत्वव्याप्यजातिमत्त्वम् ।

---

(१) व्यक्तिवृत्तित्वं—इति (क) पुस्तके ।
(२) अनेकवृत्त्यन्यत्वं—इति (क) पुस्तके ।
(३) अधिकरणगुणत्वम्—इति (क) पुस्तके ।
(४) प्रतियोगिगुणत्वं वा—इति (क) पुस्तके ।
(५) गुणत्वं वैकवृत्तित्वमाभिमतम्—इति (क) पुस्तके ।
(६) अपि इत्यधिकं (क) पुस्तके ।
(७) प्रसिद्धा—इति (क) पुस्तके नास्ति ।



यदि(१) विभक्तोपाधिव्याप्यत्वमात्रं (२)विवक्षितं तदा निबिडसंयोगस्य पृथिवीमात्रवृत्तित्वादतिव्याप्तिः । अथ तत्समनियतं(३) तदा सुखादावव्याप्तिः । तस्येश्वरात्मावृत्तित्वेनात्मत्वावच्छिन्नेतरभेदप्रयोजकत्वाभावात् । नापि संस्कारत्वान्यमनोगुणवृत्तिगुणत्वव्याप्यजातिशून्यगुरुत्वनैमित्तिकद्रवत्वान्यगुणत्वं स्थितिस्थापकेऽतिव्यापकत्वात् । तस्य स्पर्शवन्मात्रवृत्तित्वात् ।

**न स्वाश्रयेति** । पूर्वनिरुक्तविशेषगुणान्यगुणत्वमात्रं(४) विवक्षितम् । यथोक्तस्यासंभवित्वात् । **एकैकैवेति** । यद्यप्येकैकत्वमेकत्वसंख्याधिकरणत्वं तच्च द्वयोरप्यस्ति तथापि द्रव्यग्राहकयावदिन्द्रियाग्राह्यबहिरिन्द्रियग्राह्यगुणत्वव्याप्यजातिमत्त्वमात्रमभिप्रेतम्(५) । योग्या इत्यतीन्द्रियाव्याप्तिनिवृत्त्यर्थम् । ननु शब्दादीनामपि मनःसहकृतेन्द्रियवेद्यत्वात् द्वीन्द्रियग्राह्यत्वमित्यत आह—**बाह्येतीति** । **चक्षुःस्पर्शनेति** । यद्यप्येतत्संस्कारत्वमादाय भावनायामप्यस्ति तथापि संस्कारत्वान्यद्रव्यग्राहकयावदिन्द्रियग्राह्यगुणत्वव्याप्यजातिमत्त्वं विवक्षितम् । नन्वन्तःकरणग्राह्यत्वं प्रत्यक्षमात्रेऽतिव्याप्तं बहिरि-

---

(१) हि—इत्यधिकं (क) पुस्तके ।
(२) त्व—इति (क) पुस्तके नास्ति ।
(३) नियतत्वं—इति (क) पुस्तके ।
(४) मत्र—इति (क) पुस्तके ।
(५) मत्राभिप्रेतम्—इति (क) पुस्तके ।

न्द्रियेष्वपि तत्सहकारित्वादित्यत आह—**अन्तःकरणेनैवे**ति । योग्या इत्यनेन चरमज्ञानादावव्याप्तिर्निरस्ता । तत्रापि योग्यतावच्छेदकरूपसत्त्वात्(१) ।

ननु चादृष्टाद्यपि योगजधर्मादिजन्या(२)ध्यक्षस्यानुव्यवसायस्य च विषय इति तत्रातिव्याप्तिः ईश्वरबुद्ध्याद्यव्याप्तिः । न च बहिरिन्द्रियाजन्यनिर्विकल्पककारणेन्द्रियसन्निकर्षाश्रयगुणत्वव्याप्यजातिमत्त्वं तत्त्वम् । आत्मसंख्यापरिमाणयोरतिव्याप्तेः । तयोर्द्रव्ययोग्यता(३)न्तर्भूतयोग्यताकत्वेन मनोजन्यनिर्विकल्पकाविषयत्वात् ।

मैवम् । अदृष्टभावनाभिन्नात्मविशेषगुणवृत्तिगुणत्वव्याप्यजातिमत्त्वस्य बहिरिन्द्रियजन्यसाक्षात्काराविषययोगजधर्माजन्यजन्यसविकल्पकाजन्यसाक्षात्कार(४)विषयगुणत्वव्याप्यजातिमत्त्वस्य वा विवक्षितत्वात् ।

**न केनचिदि**ति । यद्यप्येतत्परमाणुगुणेष्वीश्वरबुद्ध्यादिषु चातिव्याप्तम् । तथापि संस्कारत्वान्यनिर्विकल्पकाविषयगुणत्वव्याप्यजातिशून्यगुणत्वं वेगान्यत्वे सति वेगेतरप्रत्यक्षगुणावृत्ति-

(१) वत्त्वात्—इति (क) पुस्तके ।

(२) धर्मजन्या—इति (क) पुस्तके ।

(३) ग्रहणयोग्यता—इति (ख) पुस्तके ।

(४) ॰सविकल्पकाजन्यजन्यसाक्षात्कार॰—इति (क) पु॰ । ॰सविकल्पकाजन्यसामान्यलक्षणप्रत्यासत्त्यजन्यसाक्षात्कार॰—इति (ख) पु॰ ।



गुणत्वसाक्षाद्व्याप्यजातिमत्त्वं वाभिप्रेतम् (१) । ननु स्वकारणगुणपूर्वकत्वमेव नास्तीत्यत आह—**स्वाश्रयस्ये**ति । **द्रवत्वेत्य**त्रेति । परिमाणादावयोग्यत्वान्नानुषङ्गो द्रवत्वे तु योग्यतावशात्स इत्यर्थः । **क्वाचिदि**ति । यत्र कारणद्वयसंयोगविभागाभ्यां कार्ये तावित्यर्थः । **एष्वेवे**ति । यद्यपि सम्भावनायोग्यता तदवच्छेदकत्वं न गुणत्वसाक्षाद्व्याप्यजातेः अपाकजेत्यस्य व्यर्थतापत्तेः द्वित्वादावतिव्याप्तेश्च । तथापि गुणत्वसाक्षाद्व्याप्यव्याप्यजातेस्तत्त्वम् । न च परिमाणगुरुत्वद्रवत्वस्नेहाव्याप्तिस्तत्रापि परिमाणत्वादिव्याप्यजातेः(२) सत्त्वात् । यद्वा पाकजभावनादिष्टगुणान्यत्वे सति स्वाश्रयसमवायिसजातीयगुणासमवायिकारणकवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वं तत्त्वम् । **एत इ**ति ।

ननु व्यक्तिविशेषस्याननुगततया नित्यमात्रवृत्तिवृत्तिगुणत्वव्याप्यजातिमत्त्वं तत्त्वं वाच्यम् । तत्र यदि गुणत्वसाक्षाद्व्याप्यजातिर्विवक्षिता तदा भावनायामव्याप्तिः । अथ जातिमात्रं(३) विवक्षितं तदा परमहत्त्वेऽतिव्याप्तिः ।

मैवम् । विभुविशेषगुणत्वस्य विवक्षितत्वात् । **शब्दविशेष इ**ति । शब्दविभागाजन्यः शब्द इत्यर्थः । **तूलेती**ति । प्रचयाख्यसंयोगवन्मात्रोपलक्षणमित्यर्थः । न च परिमाणाव्याप्तिः । सङ्ख्यापरिमाणोभयान्यतरमात्रजन्यजन्यपरिमाणस्य विवक्षित-

(१) अभिमतम्—इति (क) पु॰ ।

(२) अवान्तरजातेः—इति (क) पु॰ ।

(३) जातिमत्त्वमात्रं—इति (क) पुस्तके ।

त्वात् । **उत्तर इति** । कर्माजन्यः संयोग इत्यर्थः । संयोगजत्वमत्र संयोगासमवायिकारणकत्वं न तु तज्जन्यत्वमात्रमिति न विभागेऽतिव्याप्तिः । **कर्मजा इति** । कर्मासमवायिकारणका इत्यर्थः । **आद्याविति** । संयोगविभागासमवायिकारणकौ यौ न भवत इत्यर्थः । **अवेगवदिति** । वेगाजन्यो वेगोऽत्र विवक्षितः । वेगवद्द्रव्यारब्धवेगस्य वेगजन्यत्वादेवेत्यर्थः । **शब्दाविशेष इति** । शब्दसंयोगाजन्यः शब्द इत्यर्थः । बुद्ध्यपेक्षत्वं सुखादावतिव्याप्तं मत्वा व्याचष्टे— **अपेक्षाबुद्धीति** । अपेक्षाबुद्धित्वं जातिविशेषः । यद्यप्येतत्संस्काराद्यतिव्याप्तम् । तथापि मनोगुणवृत्तिकर्मजन्यजातीयावृत्तिनित्यावृत्तिगुणत्वव्याप्यजातिमत्त्वं तत्त्वम् । **द्वयस्येति** । उष्णस्पर्शस्य स्नेहस्य चेत्यर्थः । तथा च स्पर्शेऽनुष्णत्वं विशेषणमुपादेयमेव । स्नेहोपादानं तु न कर्त्तव्यमेवेति भावः । द्वयस्याप्यवर्जनमुष्णस्पर्शस्य स्नेहस्य चेत्यर्थः । तथा चानुष्णपदं त्यक्त्वा स्पर्शमात्रमेवोपादेयम् । **स्नेहेति** । कर्तव्यमेवेति भावः । एतदेव स्पष्टयति । **रूपरसेति** । यद्यप्येतत्संयोगजात्यारम्भक(१)संयोगादिव्यक्तिष्वप्यस्ति । तथापि स्वनिष्ठगुणत्वव्याप्यजातिशून्यसमवायिकारणवृत्तित्वे सति असमवायिकारणानिष्ठैकवृत्तिमात्रवृत्ति(२)गुणत्वव्याप्यजातिमत्त्वमत्राभिप्रेतम् ।

(१) जातिमात्रारम्भक—इति (क) पु० ।

(२) ०निष्ठैकमात्रवृत्तिवृत्ति०—इति (ख) पु० ।



**एत एवेति** । अनात्मधर्मेति विशेषणं रूपादीनामपि ज्ञानसुखादिविजातीयजनकत्वात् स्वरूपासिद्धिनिरासार्थम् । ज्ञानेतरस्वनिष्ठगुणत्वव्याप्यजातिविजातीयाकारणमात्रस्यैकवृत्तिमात्रवृत्तिगुणत्वव्याप्यजातिमत्त्वं तत्त्वमित्यर्थः । विजातीयमेवेत्यवधारणमुभयारम्भकव्युदासाय ।

यद्यपीश्वरेच्छायत्नयोरस्मदादीच्छायत्नजनकत्वात्तत्राव्याप्तिः बुद्धिजनकत्वाद् द्वित्वादावतिव्याप्तिश्च । तथापि ज्ञानेतरास्मदादिप्रत्यक्षात्मविशेषगुणवृत्तिगुणत्वव्याप्यजातिमत्त्वं तत्त्वमत्र विवक्षितम् ।

**सुखमिति** । सुखविषयमिति शेषः । **दुःखमिति** । दुःखविषयं द्वेषमित्यर्थः । **विषयमात्रत्वादिति** । सुखदुःखयोः स्वरूपसतोः ज्ञाना(१)पेक्षणावश्यकत्वे तेनैवान्यथासिद्धिरित्यर्थः । **विषयत्वेऽपीति** । स्वविषयकज्ञानं तयोर्व्यापारो व्यापारेण च व्यापारो नान्यथासिद्धोऽतिप्रसङ्गादित्यर्थः । **भविष्यतोरपीति** । अनागतयोः सुखदुःखयोर्ज्ञानं न व्यापार इति तयोर्ज्ञानमेव तद्धेतुरित्यन्यथासिद्धिरेवेत्यर्थः ।

ननु सुखादिमात्रं प्रति व्यभिचारेऽपि चन्दनादि(२)वैषयिकसुखादिकं प्रति सुखादीनां कारणत्वं स्यादन्यथाऽनागतचन्दनादिज्ञानादपि सुखोत्पत्तेस्तेषामपि सुखहेतुत्वं न स्यात् ।

मैवम् । वैषयिकसुखस्येन्द्रियार्थसन्निकर्षजन्यत्वात् ।

( १ ) स्वरूपसतोरकारणत्वात्तज्ज्ञाना—इति ( क ) पु० ।

( २ ) चन्दनादिवत्—इति ( क ) पु० ।

पुत्रादिसुखादेश्च पित्राद्यतीन्द्रियत्वेन तदजनकत्वात् ।

वस्तुतः (१)सुखदुःखविषयत्वेन ज्ञानस्य(२) सुखाद्युत्पादकत्वमिति विषयतया तस्य कारणतावच्छेदकत्वं न तु(३) कारणत्वम् ।

नन्वेवं सुखदुःखयोरपि इच्छाद्वेषजनकत्वं न स्यात् तज्ज्ञानयोरेव तत्त्वादित्यत आह—साक्षादिति । स्वज्ञानद्वारा पुत्रादिसुखादेः पित्रादिसुखादिजनकत्वेऽपि प्रकृते स्वविषयकप्रत्यक्षजननसमकालमिच्छादिजनकत्वं विवक्षितं सुखाद्यनन्तरं तज्ज्ञानं विना तदुत्पत्तौ विलम्बाभावेन तस्येच्छाद्य(४)जनकत्वात् । अत्रेच्छाद्वेषयोरुपादानपरिहारफलकत्वात्तयोश्चानागतमात्रविषयकत्वादनागतयोश्चाजनकत्वात् । सुखदुःखज्ञानमेवेच्छाद्वेषजनकमित्यतीन्द्रियमात्रावृत्तिज्ञानान्यात्मविशेषगुणमात्रवृत्तिगुणत्वव्याप्यजातिमत्त्वं तत्त्वं पारिभाषिकमेवेत्याहुः । संयोगेतीति(५) ।

नन्वेतस्य व्यक्तिपरतायामजनकव्यक्तावव्याप्तिर्जातिपरत्वे चानुष्णस्पर्शे इच्छाप्रयत्नयो(६)श्चातिव्याप्तिः । ईश्वरेच्छाप्रयत्नयोः समानासमानजातीयारम्भकत्वात् ।

(१) वस्तुतस्तु—इति (ख) पु० ।
(२) विषयज्ञानस्य—इति (क) पु० ।
(३) तु—इति (क) पुस्तके नास्ति ।
(४) तस्य सुखाद्य—इति (क) पु० ।
(५) संयोगादिति—इति (क) पु० ।
(६) इच्छाद्वेषयो—इति (ख) पु० ।



मैवम् । ज्ञानभिन्नेश्वरविशेषगुणानुष्णस्पर्शान्यत्वे सति स्वसमानजातीयज्ञानेतरस्वविजातीयकारणवृत्तिगुणत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् ।

स्वाश्रयेति । यथाश्रुतस्योभयत्रारम्भकेऽतिव्याप्तेः स्वाश्रयसमवेतमात्रारम्भकत्वं साधर्म्यमत्राभिमतम् ।(१)

नन्वेतस्य व्यक्तिपरतायामजनकव्यक्तावव्याप्तिः । जातिपरत्वे च वेगस्थितिस्थापकयोरतिव्याप्तिस्ताभ्यां स्वाश्रयकर्मजननात् । बुद्धिशब्दयोरव्याप्तिश्च । ईश्वरज्ञानस्यास्मदादिज्ञानजनकत्वात् । शब्दस्य च व्यधिकरणज्ञानजनकत्वात् ।

मैवम् । व्यधिकरणज्ञानाभिन्नविशेषगुणजनकानित्यगुणावृत्तित्वे सति ज्ञानभिन्नाविशेषगुणजनकवृत्तिगुणत्वव्याप्यजातिमत्त्वस्य यत्नेतरप्रत्यक्षगुणत्वव्याप्यजातिमद्विभुविशेषगुणत्वस्य वा विवक्षितत्वात् ।

स्नेह इति । द्रव्यान्तर इव जलेऽपि स्नेहः संग्रहाख्यं संयोगं जनयतीत्यर्थः । परिमाणान्ता इति । परत्रैवेत्युभयत्रारम्भकव्यवच्छेदाय । यद्यप्येतदजनकव्यक्तावव्यापकं तथापि समानाधिकरणाजनकमात्रवृत्तिज्ञानान्यजनकवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वमत्र विवक्षितम् । स्नेहान्ता इति । समानाधिकरणसजातीयजनकावृत्तिसजातीयजनकवृत्तिगुणत्वव्याप्यजातिमत्त्वमित्यर्थः । प्रयत्नान्ता इति । स्वसमानाश्रयैकवृ-

(१) साधर्म्यमभिप्रेतम्—इति (क) पु० ।

त्तिजनकावृत्तिज्ञानेतरैकाश्रितजनकवृत्तिगुणत्वव्याप्यजातिमत्त्वमित्यर्थः । विहितानिषिद्धगोचरयत्नेऽतिव्याप्तिं (१)निरस्यति । प्रयत्नशब्देनेति । अकारणत्वेति । स्वध्वंसज्ञानभिन्नं कार्यं प्रतीत्यर्थः । संयोगविशेषेणेति । न चैवं संयोगाद्यन्वयो न स्यात् शक्योपलक्ष्यसाधारणैकरूपाभावेनाजहत्स्वार्थलक्षणाया अभावादिति वाच्यम् । स्नेहसंयोगमात्रगुणविषयबुद्धिविषयत्वप्रयत्नादृष्टकार्यकारणभावबुद्धिविषयगुणत्वयोर्द्वयोः क्रमेण सत्त्वात् ।

नन्वेतदजनकव्यक्तावव्याप्तेरीश्वरज्ञानादावतिव्याप्तेर्न व्यक्तिपरम् । नापि जातिपरं द्वित्वे द्विपृथक्त्वे भावनायां ज्ञानादौ चातिव्याप्तेः ।

मैवम् । समानाधिकरणज्ञानेन जनकानित्यवृत्ति(२)स्वव्यधिकरणज्ञानान्यकार्यजनकवृत्तीश्वरविशेषगुणावृत्तिसंस्कारत्वपृथक्त्वान्यगुणत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् ।

गुरुत्वेतीति । संस्कारत्वान्यत्वे सति संयोगत्वान्यकर्मासाधारणकारणवृत्तिगुणत्वव्याप्यजातिमत्त्वमित्यर्थः । अतो नाजनकव्यक्तावव्याप्तिर्भावनादौ चातिव्याप्तिः । अवच्छिन्नपरिमाणं न क्रियाकारणं किन्तु कारणतावच्छेदकमिति न तत्रातिव्याप्तिः ।नोदनाभिघातादिति ।(३) शब्दासमवायिकार-

(१) अव्याप्तिं—इति (ख) पु०।
(२) जनकवृत्ति—इति (क) पु०।
(३) नोदनाभिघातेति—इति (क) पु०।



णावृत्तिसंयोगत्वव्याप्यजातिमत्त्वं नोदनत्वम् । शब्दासमवायिकारणवृत्तिसंयोगत्वव्याप्यजातिमत्त्वमभिघातत्वम् । तल्लक्षणमिति । कार्यकारणभावनिरूपकधर्मिनिरूपितकारणताश्रयत्वं कारणैकार्थसमवायकार्यैकार्थसमवायान्यतरप्रत्यासत्त्या आत्मविशेषगुणान्यकारणत्वं वा असमवायिकारणत्वमित्यर्थः । समवायिकारणप्रत्यासत्त्यविशेषेऽपि नादृष्टादावात्मविशेषगुणेऽसमवायिकारणत्वव्यवहारः शिष्टानामिति न विशेषणासिद्धिः । अरुणयेति । आरुण्यं नाश्रयावच्छेदकत्वेनोपलक्षणं विशेषणतायां बाधके सत्येवोपलक्षणत्वमिति व्युत्पत्ते(१)रित्यर्थः । एकाश्रितेति । ज्ञानादृष्टजीवनादिभिन्नैकवृत्तिकार्यं प्रति निमित्तकारणतावच्छेदकरूपशून्यत्वे सत्यसमवायिकारणतावच्छेदकरूपवत् स्थितिस्थापकान्यगुणत्वमित्यर्थः । निमित्तकारणत्वमेवेति । असमवायिकारणावृत्तिनिमित्तकारणवृत्तिगुणत्वव्याप्यजातिमत्त्वमाकाशेतरविभुविशेषगुणत्वं वेत्यर्थः । पूर्वोक्तासमवायिकारणलक्षणे विशेषणासिद्धिं निराकर्तुमाह—यथा चेति—विभुविशेषगुणत्वात् शब्दवन्मूर्तसंयोगासमवायिकारणकवृत्ति(२)गुणत्वव्याप्यजातिमत्त्वावश्यंभावादात्मविशेषगुणानामात्ममनःसंयोगासमवायिकारणकत्वव्यवस्थितावसमवायिकारणान्तरकल्पनायां मानाभावात् प्रागुक्तयुक्तेश्चेत्यर्थः । उभयथेति । पूर्वोक्तबुद्ध्यदृष्टादिभिन्नकार्यानिमित्तकारणवृत्त्य-

(१) व्युत्पत्तेर्विशेषणत्वव्यवस्थिते—इति (क) पु०।
(२) कारणवृति—इति (क) पु०।

समवायिकारणवृत्तिस्पर्शत्वसंस्कारत्वान्यगुणत्वव्याप्यजातिमत्त्वं तत्त्वमित्यर्थः । अकारणत्वामिति । स्वध्वंसज्ञानान्याजनकमात्रवृत्तिगुणत्वव्याप्यजातिमत्त्वमित्यर्थः । प्रदेशवृत्तित्वमिति । स्वात्यन्ताभावसामानाधिकरण्यमित्यर्थः । भावाभावान्तरवैधर्म्यं प्रमाणयन्नाह—अत्रेति । महति वृक्षादौ शाखायां कपिसंयोगोपलम्भान्मूले च तदनुपलम्भाद् भावाभावान्तरयोरदृष्टमपि सामानाधिकरण्यमनन्यथासिद्धप्रत्यक्षबलादाद्रियत इत्यर्थः । तर्हि यत्र न प्रत्यक्षं तत्र कथं तत्सिद्धिरित्यत आह--धर्मेति ।

ननु कार्येति विशेषणं व्याप्यवृत्तावीश्वरज्ञानादौ (१)व्यभिचारवारणार्थं न युक्तं(२) सामान्यत एवात्मविशेषणगुणानां प्रदेशवृत्तित्वस्य मूलेऽभिधानात्तस्याप्यव्याप्यवृत्तित्वात् । युक्तं चैतत् । ज्ञानत्वं न व्याप्यवृत्तिवृत्ति अव्याप्यवृत्तिवृत्तिसंस्कारत्वान्यगुणत्वव्याप्यजातित्वात् संयोगत्ववत् इति मानात् । न च मूर्तगुणजातित्वमुपाधिः । शब्दत्वे साध्याव्यापकत्वात् । नापि कार्यमात्रवृत्तित्वमुपाधिः । आकाशत्वादौ साध्याव्यापकत्वात् । न च विपक्षे बाधकाभावः । ईश्वरज्ञानादीनां व्याप्यवृत्तित्वेऽस्मदादिज्ञानानामव्याप्यवृत्तित्वे व्याप्याव्याप्यवृत्तिजातीयताविरोधात् ।

अत्राहुः—ईश्वरज्ञानादीनां व्याप्यवृत्तित्वे मूलग्रन्थस्याव्याप्यवृत्तिवृत्तिसंस्कारत्वान्यगुणत्वव्याप्यजातिमत्त्वे तात्पर्यान्न विरोधः । अनुमाने च पक्षधर्मगुणवृत्तित्वावच्छिन्नसाध्यव्यापकं कार्यमात्रवृत्तित्वमुपाधिः । न चोक्तविपक्षबाधकाद्धेतोः साध्यव्याप्यतया तदव्यापकत्वेनानुपाधित्वम् । मूर्तगुणानामेव तथा विरोधात् । तत्रैव प्रमाणप्रसरात् ।

विपक्षे बाधकमाह--अन्यथेति । अविरोधायेति । एतत्तात्पर्यं संयोगे विवेचयिष्यामः । कालनिष्ठनित्यगुणवृत्तिगुणत्वव्याप्यजातिशून्यविभुगुणवृत्तिसंस्कारत्वान्यगुणत्वव्याप्यजातिमत्त्वं पारिभाषिकमेव प्रादेशिकत्वमित्यप्याहुः ।

आश्रयेति । स्वात्यन्ताभावासमानाधिकरणगुणत्वं प्रदेशवृत्तिगुणान्यगुणत्वं वेत्यर्थः । आश्रयनाशादेवेति । यद्यपि विनश्यदवस्थसंयोगेऽतिव्याप्तिः नित्यरूपापादाव्याप्तिश्च तथापि स्वाश्रयसमानकालीन(१)ध्वंसाप्रतियोगिमात्रवृत्तिगुणत्वव्याप्यजातिमत्त्वम्(२) । पाकजानामिति । वेगोऽप्यत्रोपसंख्येयः । तस्यापि समानाधिकरणध्वंसप्रतियोगित्वात् । अयावद्द्रव्यभावित्वं च पूर्वनिरुक्तरूपरहितगुणत्वम् । मूर्त्तेति । मूर्त्तिव्याप्यतावच्छेदकविशेषगुणवृत्तिजातिमत्त्वमित्यर्थः । स्पर्शव्याप्यत्वमिति । स्पर्शसमानाधिकरणमात्रवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वमित्यर्थः । जलवृत्तित्वं जलवृत्तिमात्रवृत्तिगुणत्व-

(१) व्याप्यवृत्तीश्वरज्ञानादौ—इति (क) (ख) पु० ।
(२) वारणायायुक्तं—इति (क) पु० ।

(१) तथाप्याश्रयसमकाल—इति (क) पु० ।
(२) तत्त्वम्--इति (क) पुस्तकेऽधिकम् ।

व्याप्यजातिमत्त्वम् (१) । एवमग्रेऽपि निर्वाच्यम् । जलावनीति । जलावनिवृत्तिवृत्तितदन्यवृत्त्यवृत्तिगुणत्वव्याप्यजातिमत्त्वमित्यर्थः । पृथिवीमात्रेति—पृथिवीवृत्तिविशेषगुणमात्रवृत्तिगुणत्वव्याप्यजातिमत्त्वमित्यर्थः । इत्थमग्रेऽपि । पाकजत्वमिति । तेजःसंयोगासमवायिकारणकैकवृत्तिगुणवृत्तिगुणत्वव्याप्यजातिमत्त्वमित्यर्थः । अतो न तेजोऽवयवसंयोगजन्यतेजोऽवयविसंयोगेऽतिव्याप्तिः । नापि विनश्यदवस्थपृथिवीरूपादावव्याप्तिः । परिमाणेति । परिमाणासमवायिकारणवृत्तिसंयोगत्वान्यगुणत्वव्याप्यजातिमत्त्वमित्यर्थः । शब्दकारणत्वं शब्दासमवायिकारणत्वमित्यर्थः । अभिघातेति—अभिघातनिमित्तकारणवृत्तिगुणत्वव्याप्यजातिमत्त्वमित्यर्थः । अनेकाश्रितेति । अनेकाश्रितगुणासमवायिकारणवृत्तिगुणत्वव्याप्यजातिमत्त्वमित्यर्थः । दिक्कालेति । दिक्कालसंयोगासमवायिकारणकैकवृत्तिगुणत्वमित्यर्थः । अतो न दिक्कालसंयोगजसंयोगेऽतिव्याप्तिः । परत्वापरत्वेति ।

ननु चरमज्ञानं भोगरूपमन्त्योपान्त्यशब्दवत् स्वविषयसुखदुःखाभ्यामेव नाश्यम् । न च विनिगमकाभावः । कार्यविभुविशेषगुणत्वेन शब्दवत् समानाधिकरणगुणनाश्यत्वानुमानात् ।

अत्राहुः—ज्ञायतेऽनेनेति व्युत्पत्त्या ज्ञानं चरमः संस्कार एवात्र विवक्षितः । यद्वा । अन्त्यशब्दस्य नोपान्त्यशब्दनाश्यत्वं क्षणिकत्वापत्तेः । किन्तूपान्त्यशब्दध्वंसस्यैवान्त्यशब्द-

(१) इत्यर्थः—इति (क) पुस्तकेऽधिकम् ।



ध्वंसकत्वम् । अनुमानं(१) चरमसंस्कारेऽनैकान्तिकमप्रयोजकं च । किञ्च । ये विशेषगुणानाश्या विभुविशेषगुणास्ते स्वानन्तरोत्पत्तिकविरोधिगुणनाश्या एवेति नियमः । अन्यथा प्राक्तनसंस्कारेण ज्ञानाद्युत्पत्त्यग्रिमक्षण एव तेषां नाशादप्रत्यक्षत्वापत्तिः । निमित्तनाशनाश्यत्वं चात्र मूर्तवृत्तिमात्रवृत्तिगुणत्वव्याप्यजातिशून्यत्वे सति संयोगान्यनिमित्तनाशनाश्यत्वं विवक्षितमतो न चरमपार्थिवपरमाणुरूपादेः(२)परमाण्वाकाशसंयोगस्य च निमित्तनाशनाश्यत्वादतिव्याप्तिः ।

गुणान्तरेति । पूर्वनिरुक्तान्यगुणत्वमित्यर्थः । कार्यगुणानामिति(३) । अत्र विशेष्यसमभिव्याहारादेवकारस्यान्ययोगव्यवच्छेदो विवक्षितः नायोगव्यवच्छेदः । तेनाकार्यगुणानां नाश्रयनाशनाश्यत्वमित्यर्थान्न विरोधिगुणानाश्यकार्यगुणाव्याप्तिः । अपार्थिवेति । अत्र पार्थिवपरमाणुवृत्तिस्थितिस्थापकादेरपि नित्यत्वात् स्नेहपर्यन्तमेवापार्थिवत्वं परमाणोर्विवक्षितम्—उत्तरत्र परमाणुमात्रमेव विवक्षितमित्याहुः । नित्यत्वमत्र ध्वंसाप्रतियोगिगुणत्वम् अकार्यत्वं च प्रागभावाप्रतियोगिगुणत्वम् एतदन्यगुणत्वं चानित्यत्वादि । आदिपदसंग्राह्यं च परत्वापरत्वगुरुत्वद्रवत्ववेगस्थितिस्थापकानां मूर्त्तमात्रसा-

(१) च—इति (क) पुस्तकेऽधिकम् ।

(२) रूपादेश्चरम—इति (क) पु० ।

(३) कार्यगुणानामेवेति—इति (क) पु० ।

मान्यगुणत्वं(१) धर्माधर्मभावनानामतीन्द्रियात्मविशेषगुणत्वमित्यादि ।

ननूद्देशक्रमप्राप्ततया रूपस्यैव निरूपणे कर्तव्ये रसादिनिरूपणमयुक्तमित्यत आह—**संक्षेपार्थमिति** । संक्षेपो ग्रन्थलाघवम् ।

**पारिभाषिक्य इति** । काचित्संज्ञा जातिरूपप्रवृत्तिनिमित्तवती । प्रवृत्तिनिमित्तं च वाच्यं सद्वाच्यवृत्तित्वे सति वाच्योपस्थापकं गोत्वादि । काचिदुपलक्षणवती । तच्च वाच्योपस्थापकमात्रं न तु शक्यन्तर्भूतमिति विशेषः । यथा शब्दाश्रयत्वोपलक्षिते आकाशमिति(२) संज्ञा । काचिदौपाधिकी । यथोपलक्षणीभूतपचिक्रियान्तर्भावेण पाकानुकूलकृतियोग्यतामात्रेण पाचकादिसंज्ञा । यत्र तु प्रवृत्तिनिमित्तोपलक्षणयोगाभावे संकेतविषयस्य व्यक्तिविशेषस्य प्रत्यक्षेणोपस्थितिस्तत्र या शृङ्गग्राहिकया चैत्रादिसंज्ञा सा पारिभाषिकी । तासु रूपादिसंज्ञा कतमेत्यर्थः । **रूपत्वेति** । तथा च गवादिपदवन्नैमित्तिकीयं संज्ञेत्यर्थः । **तदसिद्धमिति** । जातिरूपमिति शेषः । प्रकृते रूपाकारानुगतमते लौकिकानामभावादित्यर्थः । न च निषेध्याप्रसिद्धिः । रूपत्वस्योभयसिद्धत्वात्तदीयजातित्वोपाधित्वयोरेव विवादात् । शुक्लरूपं शुक्लत्वतद्व्याप्येतरगुणत्वव्याप्यजातिमन्न भवतीत्यर्थ इत्यन्ये । **चक्षुर्मात्रेति** । द्वीन्द्रियग्राह्यसंख्यादिव्यावर्तनाय मात्रपदम् । यद्यपि रूपेऽपि तन्नास्ति मनसापि तद्ग्रहात्, चक्षुर्मात्रबहिरिन्द्रियग्राह्यत्वं च रूपाभावेऽपि गतम्, भावत्वेन विशेषणेऽपि त्रसरेणुसंयोगादावतिव्याप्तम्, चक्षुर्ग्राह्यविशेषगुणत्वं च स्नेहादावपि गतम् । तथापि चक्षुर्मात्रबहिरिन्द्रियग्राह्यविशेषगुणत्वमुपाधिः । एवं रसनादिमात्रबहिरिन्द्रियग्राह्यविशेषगुणत्वादिकं रसत्वादीत्यर्थः । न चातीन्द्रियरूपे तद्व्यवहारानापत्तिर्ग्रहणानन्तरं रूपप्रत्ययापत्तिश्च, चक्षुर्ग्रहणयोग्यतायाश्च तदवच्छेदकरूपाप्रतीतावज्ञानादिति वाच्यम् । नीलपीताद्येकैकमेवेति मते तस्यातीन्द्रियत्वाभावात् । न च तस्य जातित्वापत्तिः । गोत्वादिना परापरभावानुपपत्तेः । नीलतरादिप्रतीतेश्च तदन्यरूपासम्भेदविषयत्वात् । **अननुसंहितेति** । रूपादिधीः साक्षात्कारिणी चक्षुर्मात्रग्राह्यत्वं च न प्रत्यक्षम् इन्द्रियतज्जन्यज्ञानगोचरत्वयोरतीन्द्रियत्वादित्युपाधेरज्ञाने सा न स्यादित्यर्थः । ननु मानान्तरोपस्थापितं चक्षुर्ग्राह्यत्वमध्यक्षे भासते न वा रूपादिधीः प्रत्यक्षसिद्धेत्युभयसिद्धं रूपादिव्यवहारस्तूक्तोपाधिनिबन्धन(१) इत्यत आह—**न चेति** । चक्षुरादिस्वरूपे तत्तैजसत्वादौ च मिथोव्यावृत्तरूपाद्युपलब्धिं विना मानान्तराभावात् तत्र तद्ग्राह्यत्वाच्च(२) तद्भेदेऽन्योन्याश्रय इत्यर्थः ।

ननु नीलपीतादिधीकरणतया चक्षुःसिद्धौ नायं दोषः । न चैवं नीलाद्येकैकधीकरणतया भिन्नभिन्नकरणसिद्धौ पञ्चबहि-

( १ ) गुणत्वमित्यर्थः—इति (क) पु० ।
( २ ) आकाशेति—इति (क) पु० ।



( १ ) उपाधिनिमित्तक—इति (क) पु० ।
( २ ) मानाभावात् तद्ग्राह्यत्वाच्च—इति (क) पु० ।

रिन्द्रियनियमानुपपत्तिः । नीलपीतादिषीकरणेषु गन्धाद्यव्यञ्जकत्वे सति नीलादिव्यञ्जकत्वेन तैजसत्वं प्रसाध्य तत एवेन्द्रियविभागात् नीलादिकं(१) पक्षीकृत्य लाघवादेककरणसाधनाद्वा तैजसेन्द्रियमात्रग्राह्यविशेषगुणत्वेन च नीलादौ(२) रूपाकारानुगतधीः स्यात् ।

मैवम् । एतादृशीं परम्परामविदुषोऽपि रूपप्रत्ययात् । चक्षूरूपस्य घटादिरूपाभिन्नत्वे प्रत्यक्षत्वप्रसङ्गाच्च । एकस्यैव उद्भवानुद्भवविरोधात् । पाकेन रक्तमुत्पन्नं श्यामं नष्टमित्यनुभवाच्च । न चायं भ्रमो बाधकाभावात्(३) । न चोत्पादनाश(४)धीः समवायविषया । रक्तसमवायो(५) नष्ट इत्यनुभवापत्तेः समवायनित्यत्वस्य वक्ष्यमाणत्वाच्च । नीलादितुल्यतया गन्धादि(६)व्यक्तीनामपि नित्यतापत्तेश्च । किंच नीलादिव्यक्तीनामननुगमेन(७) साक्षात्कारकारणत्वाभावेऽनुगतधर्मसिद्धौ तज्जातित्वे बाधकाभावात् शुक्लाकारानुगतधीकारणतयाऽनुगतशुक्लत्वजातिसिद्धौ(८) शुक्लत्वजातिर्गुणत्वव्याप्यजातिव्याप्या शु-

( १ ) नीलादीन्—इति (क) (ख) पुस्तकयोः ।
( २ ) ग्राह्यगुणत्वेन नीलादौ—इति (क) पु० ।
( ३ ) च—इत्यधिकं (क) पुस्तके ।
( ४ ) विनाश—इति (क) पु० ।
( ५ ) श्यामसमवायो—इति (ख) पु० ।
( ६ ) गन्धज्ञानादि—इति (क) पु० ।
( ७ ) अननुगमे—इति (क) पु० ।
( ८ ) शुक्लत्वजातिसिद्धौ—इति (क) पुस्तके नोपलभ्यते ।



क्लमात्रवृत्तिजातित्वात् तदवान्तरतारतम्यवदित्यप्याहुः ।

वस्तुतो यद्यपि रूपाकारानुगतधीर्नास्ति लौकिकानां तथापि नीलो वर्णः पीतो वर्ण इति वर्णाकारानुगतधीरस्त्येव । वर्णत्वमेव च(१) रूपत्वम् । गन्धरसादौ चानुगतमतिरस्त्येव सार्वलौकिकीति प्रत्यक्षत एव तत्सिद्धिः ।

(२)भाष्यस्थतत्रपदं व्याचष्टे–गुणेष्विति । निर्द्धारणेन यल्लभ्यते तदाह—गुणत्वेति । (२)चक्षुषैवेति । न चातीन्द्रियरूपाव्याप्तिः चक्षुर्मात्रग्राह्यगुणत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् । न चैवं रूपत्व(३)पर्यवसाने पूर्वेण सह पौनरुक्त्यम् । शुक्लत्वादिजातिविषयत्वादेतस्य । रूपत्वपरत्वेऽपि तस्य(४) प्रकारान्तरेणाभिधानान्न पौनरुक्त्यमित्यन्ये ।

एतेनेति । एतेन इतरभेदानुमानेन । आश्रयासिद्धिरित्यर्थः । आश्रयमिति । प्रमाणद्वारा लक्षणमुक्त्वा आश्रयद्वारा लक्षणं वक्तुमित्यर्थः । संख्यादावतिव्याप्तिं निरस्यति—एकवेति । न च स्पर्शद्रवत्वयोरतिव्याप्तिः(५) । पृथिव्यादित्रिकविशेषगुणवृत्तिवायुवृत्त्यवृत्तिगुणत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् । अर्थक्रियामिति । चाक्षुषप्रत्यक्षकारणविशेषगुणत्वम-

( १ ) च—इति (ख) पुस्तके नास्ति ।
( २ ), ( २ ) (क) पुस्तके नास्ति ।
( ३ ) रूपत्व एव—इति (क) पु० ।
( ४ ) अस्य—इति (क) पु० ।
( ५ ) न चात्र स्पर्शद्रवत्वाद्यतिव्याप्तिः—इति (क) पुस्तके ।

र्थक्रियाद्वारकं लक्षणमभिधातुमित्यर्थः ।

ननु वायौ रूपाभावप्रत्यक्षे तमःप्रत्यक्षे च रूपस्य व्यभिचारान्न कारणत्वम्(१) अनुद्भूतरूपाव्याप्तिः(२) उद्भूतरूपवत्त्वस्य प्रत्यक्षकारणतावच्छेदकत्वात् ।

मैवम् । चाक्षुषनिर्विकल्पककारणविशेषगुणवृत्तिगुणत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् ।

स चोद्भूतेति । ननूद्भूतरूपवत्त्वस्य प्रत्यक्षकारणतावच्छेदकत्वाद्दण्डत्ववत्तस्य कारणत्वं न स्यात् ।

मैवम् । उद्भूतरूपोत्कर्षात्प्रत्यक्षोत्कर्षेण तस्य कारणत्वात् । दण्डत्वे(३)नैवम् । प्रकारभेदेनोभयस्याप्यविरोधाच्च । चाक्षुषद्रव्यज्ञाने विषयजन्यतया विषयभानेनैव तत्र रूपस्य कारणत्वात् । द्रव्ये चानुगतानतिप्रसक्तत्वेन कारणतावच्छेदकत्वात् । न तु स्वीयमिति ।

अत्र चक्षुः साक्षात्कारकारणरूपवत् साक्षात्कारकारणतेजस्त्वात् आलोकवत् इत्यत्रोद्भूतरूपवत्त्वमुपाधिः । न वास्य गुणमन्तर्भाव्येन्द्रियत्वं द्रव्यगर्भत्वात्तल्लक्षणस्येति यदिन्द्रियं तत्प्रत्यक्षहेतुग्राह्यजातीयगुणवदित्येव सगुणानामिन्द्रियभाव इत्यस्यार्थ इति सम्प्रदायविदः ।

प्रकारपदार्थान्वयानुरोधाच्छुक्लत्वादि जातिपरतया व्या-

(१) प्रत्यक्षमात्रे कारणत्वम्—इति (क) पु० ।

(२) च—इत्यधिकं (क) पुस्तके ।

(३) तु—इत्यधिकं (क) पुस्तके ।



चष्टे—शुक्लत्वादय इति । विचित्रतयेति । द्रव्यत्वसाक्षाद्व्याप्यजातिसमानाधिकरणगुणमात्रवृत्त्यनेकजातिव्यापकजातिमद्गुणत्वं विचित्रता पाकजत्वव्यापिकेत्यर्थः ।

न च जलपरमाणुः कार्यरूपवान् भूतत्वादिति वाच्यम् । पक्षधर्मपरमाणुत्वावच्छिन्नसाध्यव्यापकस्य पृथिवीत्वस्योपाधित्वात् । कार्यगुणानां निमित्तासमवायिकारणगुणापूर्वकतया कारणपदं समवायिकारणपरतया व्याचष्टे—अवयविष्विति । ननु पार्थिवपरमाणुरूपयोरभेदाद्रूपस्य कार्यत्वे विनाशित्वे च परमाणोरपि तथात्वापत्तिः ।

न च गुणगुणिनोरभेदे मानाभावः । न हि नीलः पटः दण्डी पुरुषः इति प्रत्यययोर्विषयवैलक्षण्यमनुभूयत इति दण्डिपुरुषयोरिव नीलपटयोरप्यभेद एव। न च विशेषणसम्बन्ध एव तद्विषयो नाभेद इति वाच्यम् । दण्डी पुरुष इतिवन्नीली पट इति प्रतीत्यापत्तेः । न च मतुपो लोपादभेदोपचाराद्वा तदुपपादनम् । तयोः शब्दधर्मत्वादत्र त्वभेदबुद्धेर्मानत्वादित्यभिप्रेत्याह—एतेनेति। अग्निसंयोगाद्रूपस्य नाशेऽपि द्रव्यानाशेनेत्यर्थः। तदेव स्पष्टयति—तथाहीति । न च रूपशब्दादिति । यद्येतत्पटाभिन्नाः सर्वाः शुक्लव्यक्तयः स्युस्तदैनं पटमानयेत्येतच्छब्दजन्यानयनकर्माणि स्युरेतत्पटवादित्यर्थः । अभेदे सामान्यविशेषाभावं परिहरति(१)—न चाभेद इति । सामान्यविशेष-

(१) निरस्यति—इति (क) पुस्तके ।

भावेऽभेदं (१)निरस्यति--न च सामान्येति। द्रव्यमपीति। यद्ययं पटः शुक्लरूपाभिन्नः स्यादन्धस्य त्वगिन्द्रियग्राह्यो न स्यादित्यर्थः। शुक्लादिरूपमिति। अन्धस्य त्वगिन्द्रियगृह्यमाणशुक्लपटरूपं यद्येतत्पटाभिन्नं स्यादेतत्साक्षात्कारविषयः स्यादित्यर्थः। तस्माद्गुणगुणिनोः प्रतिनियतेन्द्रियवेद्यतैव तयोर्भेदे मानम्। न च रूपस्य पटात्मकतयान्धेन ग्रहेऽपि रूपत्वं न तेन गृह्यते रूपत्वग्रहे चक्षुषः प्रयोजकत्वादिति वाच्यम्। धर्मधर्मिणोरभेदपक्षे रूपत्वस्यापि रूपाभिन्नत्वात्। त्वचा रूपत्वस्यापि ग्रहापत्तेश्च। जातेर्व्यक्तिग्राहकेन्द्रियग्राह्यत्वादिति भावः।

यदि चेति। यदि रूपं पृथिव्यभिन्नं स्यात् जलतेजोवृत्ति न स्यात्(२)। यदि चेति। यदि पयःपावकौ रूपाभिन्नौ स्यातां पृथिवी स्यातामिति तदीयाभ्युपगमे न तर्काः।

ननु रूपस्य विशेषः पृथिवी स्यादिति नोक्तदोष इत्यत आह--सामान्यविशेषेति। नन्वत्यन्ताभेदे सर्वमिदं दूषणम् अत्र तु भेदाभेद इति द्रव्यस्य रूपाभेदेऽपि रूपं द्रव्याद्भिन्नम्। न चात्र मानाभावः। अन्योन्याभावत्वम् अव्याप्यवृत्तिवृत्ति नित्याभाववृत्त्यभावत्वसाक्षाद्व्याप्यधर्मत्वात् अत्यन्ताभावत्ववदित्यनुमानात्। न चाप्रयोजकत्वम्। नीलः पट इति सामानाधिकरण्यबुद्धेरनन्यथासिद्धेः। अत्यन्तभेदाभेदाभ्यां तदनुपपत्तेः।

(१) अव्यभेदं—इति (क) पु०।
(२) इत्यर्थः—इत्यधिकं (क) पुस्तके।



अत्राहुः। भेदाभेदयोः परस्पराभावरूपतया विरुद्धयोरेकत्र समावेशाभावः। न च संयोगप्रतिवन्दिः। तस्यैव हि तत्राभावोऽवच्छेदकभेदेन वर्तते ज्ञायते वा(१) यथा संयोगाद्यभावः। तदिहापि(२) नीलस्यापि पटान्योन्याभावः पटत्वेनेति नीलात्पटस्य भेदोऽस्तु। अभेदस्तु नीलान्योन्याभावाभावरूपः पटे न पटत्वावच्छेदेनैव। एकावच्छेदेन भावाभावयोरवृत्तेरप्रतीतेश्च। नाप्यवच्छेदकान्तरेण। तदज्ञानेऽपि नीलः पट इत्यनुभवात्(३)। नीलः पट इति प्रतीतिश्च नीलसम्बन्धविषया। शब्दप्रयोगश्चाभेदोपचारात् मतुब्लोपाद्वेति संक्षेपः।

प्रकारेति। अवान्तरानेकभेदाभावादित्यर्थः। तत्रापीति। उत्कर्षस्य गुणक्रियामात्रनियतत्वादित्यर्थः। शुक्लत्वावान्तरजातिर्न घटत्वव्याप्या। स्फटिकादौ व्यभिचारात्। नापि तस्य व्यापिका। नीलघटे व्यभिचारादेकत्र शुक्लपटे तयोः संकरः स्यादिति(४)। न चैतादिति। न च रूपादीनां(५) नित्यत्वे तत्समवायस्योत्पत्तिविनाशौ स्याताम्। अग्निसंयोगाद्रूपं नष्टमित्यनुभवो न तु रूपसमवायो विनष्ट इति। तैरपि नित्यसमवायस्य नित्यत्वोपगमाच्च। कार्यगुणत्वादिति। कार्य-

(१) च—इति (क) पुस्तके।
(२) तद्वदिहापि—इति (क) पु०।
(३) इति प्रत्ययात्—इति (क) पु०।
(४) भावः--इत्यधिकं (क) पु०।
(५) रूपत्वादीनां—इति (क) पु०।

स्य गुणत्वादित्यर्थः । अस्मदादीतीश्वरज्ञानादिना व्यभिचारवारणाय । विशेषगुणेति आत्मैकत्वेऽनैकान्तिकत्वव्यावर्तनाय । ननु रूपादीनामकारणमपि व्यञ्जकं द्रव्यमतो न द्रव्यनाशे तदुपलम्भापत्तिरित्यत आह–आश्रयस्येति। **सत्याश्रय इति।** अवयविरूपं नित्यं यदि परमाणुरूपाद्भिन्नं तदा कारणत्वेन परमाणुरूपं न सिध्येदिति तयो रूपमभिन्नं वाच्यं तथा च परमाणौ रूपनिवृत्तिरग्निसंयोगान्न स्यादित्यर्थः । रूपस्य नित्यत्वे तत्समवाय एव नश्यतीति प्रागेव निरस्तम् । किञ्चावयविरूपस्य नित्यतायामनित्यवृत्तिनित्यत्वेन जातिवदाश्रयं विनाऽन्यत्राप्युपलभ्येतेति भावः ।

पूर्वोक्ताया(१) जातेरनतिक्रमेणैव लक्षणान्तरमिति दर्शयन्नाह–**रसत्वेति** । (२)**रसनेनैवेति** । गुणपदं रसत्वतद्व्याप्यजातिव्यावर्तनार्थम्(२) । यद्यपीदमतीन्द्रियरसाव्यापकं(३) तथापि रसनग्राह्यगुणत्वव्याप्यजातिमत्त्वं रसनेतरबहिरिन्द्रियग्राह्यगुणत्वव्याप्यजातिमत्त्वं वा लक्षणम् । एवकारेण यदि रसो द्रव्याभिन्नः स्याद्रसनेन्द्रियमात्रग्राह्यो न स्यादिति तर्कः सूचितः । अत एवाह—**प्रमाणलक्षणे इति । आश्रयमाहेति** । पूर्ववत्तात्पर्यमूह्यम् । अदृष्टविशेषजन्यात्ममनःसंयोगो जीवनं मरणं

(१) पूर्वोक्त—इति (क) पु० ।

(२)-(२) नास्ति (क) पुस्तके । तस्य स्थाने—रसनेनैव गृह्यते यो गुण इति गुणपदेन रसत्वतद्व्याप्यजातिव्यावृत्तिः—एवं वर्तते ।

(३) अव्यापि—इति (क) पु० ।



चादृष्टविशेष(१)जन्यात्ममनःसंयोगध्वंसः । दौर्बल्यं बलाभावः, न तु कृशत्वम् । **बाह्येनेति** । यद्यप्येतावता जलस्य कारणत्वसिद्धावपि तद्रसस्य कारणत्वं न सिध्यति । तथा जलं प्रतिनियतेन्द्रियजन्यसाक्षात्कारकारणप्रतिनियतेन्द्रियग्राह्यजातीय(२)गुणवत् प्रतिनियतेन्द्रियग्राह्यगुणग्राहकविशेषगुणवन्मूर्तत्वात् आलोकवदित्यनुमानात् तत्सिद्धिः ।

**विभागमाहेति** । न च चित्ररूपवत् षड्सा हरीतकीति व्यवहाराच्चित्ररसोऽप्यधिकः तत्र प्रमाणसद्भावात् । तथाहि । विजातीयनानारूपवदवयवारब्धो घटो न नीरूपोऽप्रत्यक्षत्वप्रसङ्गात् । न चोद्भूतरूपवत्समवेतत्वमेव द्रव्यचाक्षुषत्वे तन्त्रम् । यत्र हि चित्ररूपावयवारब्धोऽवयवी तत्र एतस्याप्यभावात् । न च तत्रापि रूपवत्परम्पराश्रितत्वमस्तीति वाच्यम् । परम्पराया अननुगमात्(३) । रूपवत्समवेतत्वापेक्षया रूपवत्त्वस्य लघुत्वाच्च । नापि तत्राप्यव्याप्यवृत्तिनानारूपाणि(४) वर्तन्ते । तेषां व्याप्यवृत्तिजातीयताविरोधात् । एकं कर्बुररूपमित्यनुभवाच्च । चित्ररसे तु मानाभावः । अवयविनो गुणविरोधेन नीरसत्वे बाधकाभावात् । रसनस्य द्रव्याग्राहकत्वात् । षड्सत्वव्यवहारस्य तु तत्तद्रसजन्योपकारजनकत्वेनाप्युपपत्तेः । नापि क्षाररसोऽ-

(१) नाश—इत्यधिकं (क) (ख) पुस्तकयोः ।

(२) जातीय—इति (क) पुस्तके नास्ति ।

(३) परम्पराया अनवगमात्—इति (क) पु० ।

(४) तत्राव्याप्यवृत्तीनि रूपाणि—इति (क) पु० ।

धिकः । लवणजातीयत्वस्यैव प्रसिद्धत्वात् ।(१)

**भावप्रधान इति** । अस्येत्यनेनान्वयानुरोधादित्यर्थः(२) । **एतेनेति** । उत्पत्तिविनाशप्रदर्शनेन तत्कारणसत्त्व(३)स्यावश्यकत्वादित्यर्थः ।

**गन्धत्वेति** । गन्धाकारानुगतमत्या तत्सिद्धिरिति भावः । **गुणेष्विति** गन्धत्वतद्व्याप्यजातिव्यावर्तनार्थः(४) । **एतेनेति** । प्रत्यक्षं प्रमाणम् । घ्राणग्राह्यगुणत्वव्याप्यजातिमत्त्वं लक्षणमित्यर्थः(५) । **पृथिव्यामेवेति** । पृथिवीवृत्तिमात्रवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वमित्यर्थः । इन्द्रियगुणानामुक्तयुक्तेरिन्द्रियासहकारित्वादन्यथा व्याचष्टे—**घृतादीति** । यद्यप्येतावता घृतस्य सहकारित्वं सिध्यति न तु तद्गन्धस्य तथापि घृतं प्रतिनियतेन्द्रियग्राह्यगुणग्राहक(६)प्रतिनियतेन्द्रियग्राह्यजातीयगुणवत्(७) प्रतिनियतेन्द्रियग्राह्यगुणग्राहकविशेषगुणवन्मूर्तत्वादालोकवत् इत्यनुमानात्सिद्धिः(८) । **सामान्यविशेषमिति** ।

(१), (२) "नापि क्षाररसोऽधिकः लवणजातीयत्वस्यैव प्रसिद्धत्वात्' । इति पाठः 'अनुरोधादित्यर्थः' । इत्यस्याग्रे वर्त्तते ।

(३) सत्त्व—इति (क) पुस्तके नास्ति ।

(४) व्यावर्तनाय—इति (क) पु० ।

(५) लक्षणमिति—इति (क) पु० ।

(६) 'प्रतिनियतेन्द्रियग्राह्यगुणग्राहक'-इति (क) पुस्तके नास्ति ।

(७) विशेषगुणवत्—इति (क) पु० ।

(८) तत्सिद्धिः—इति (क) पु० ।



प्रत्यक्षसिद्धमिति शेषः । **न त्विति** । असुरादिवत्(१)पर्युदासनञा सुरभिविरोधी गन्धोऽसुरभिशब्दवाच्यो न तु तदभाव इत्यर्थः । **अधर्मवदिति** । यथा धर्मत्वविरोधिजातिमान् अधर्मो न तु तदभावमात्रमित्यर्थः । **उत्पत्त्यादय इति** । बहुवचनोपरोधेनाचष्टे—(२)**उत्पत्तिरिति** ।

**विषयसंस्कारकतयेति** । आलोकरूपादेः सर्वत्र भावा(३)द्रूपादिचतुष्टयस्य विषयीभूय कारणत्वमित्यर्थः । यद्वा किं रूपादेरिन्द्रियसंस्कारकतया प्रत्यक्षे कारणत्वं(४) किं वा विषयसंस्कारकतयेत्यपेक्षायामिदमुक्तम् । अन्यथा आलोकसंयुक्तेन चक्षुषा(५)न्धकारस्थपटादि(६)ग्रहणप्रसङ्गः । **रूपानुविधायीत्यस्य** यत्रैव रूपं तत्र स्पर्श इत्यर्थे वायौ नीरूपे स्पर्शो न स्यादित्यन्यथा व्याचष्टे—**रूपमिति** । **रूपव्यापकत्वमिति** । यद्यपि रूपव्यापकत्वं रूपसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं रूपस्यापि तथापि भेदे(७) सतीति विवक्षितम् । **यद्यपीति** । प्रथमव्याख्यानेऽपि(८)दूषणम् ।

(१) असुराविद्यावत्—इति (क) पु० ।

(२) उपरोधायाचष्टे—इति (क) पु० ।

(३) लाभात्—इति (क) पु० ।

(४) प्रत्यक्षकारणत्वम्—इति (क) पु० ।

(५) संयुक्तचक्षुषा—इति (क) पु० ।

(६) घटादि—इति (क) पु० ।

(७) रूपभेदे—इति (क) पु० ।

(८) अपि—इति (क) पुस्तके नास्ति ।

अप्रकृतत्वशङ्कामपनयन्नाह–अथेति । प्रसङ्गलक्षणा सङ्गतिः । परमाणोः पृथिव्यजन्यत्वेऽपि पार्थिवत्वमुपपादयति —पृथिव्या इति । तस्येदमित्यत्र सम्बन्धमात्रस्य विवक्षितत्वादित्यर्थः । पृथिवीत्वस्येति । जातिविशिष्टशक्तपदस्य विशेषणे तात्पर्यादित्यर्थः । पाकजत्वेनेति । धर्मिपरत्वे भेदगर्भषष्ठ्यर्थानुपपत्तेरित्यर्थः । यद्यपि विनाशनिरूपणं न साक्षात् प्रतिज्ञातं तथापि प्रकारशब्देन तस्यावबोधः । पूर्वेषां विनाशादुत्तरेषामुत्पत्तिरित्यस्यैवोत्पत्तिप्रकारत्वात् । विप्रतिपत्तेरिति । पार्थिवावयविरूपादौ तेजःसंयोगासमवायिकरणकत्वं न वेति संशयः । स्वतन्त्राः कार्य(१)ध्वंसवन्त इत्यर्थः ।

कार्यं त्विति । द्व्यणुकादिलक्षणमित्यर्थः । प्रयोजनं त्विति । अवयविविशेषगुणानां यावदाश्रयभावित्वस्थितौ बुद्ध्यादीनां शरीरे सत्येव नाशात्तदन्यधर्मत्वसिद्धिद्वारात्मतत्त्वज्ञानं प्रयोजनमित्यर्थः ।

नन्वामेति यद्यवयविनो विशेषणं तदा वैयर्थ्यं सर्वस्य तस्यामत्वात्(२) । अथ परमाणोस्तदा विरोधः सर्वस्य तस्य पक्वत्वादित्यत आह—प्रकृतेति । आपाकनिक्षिप्ताग्निसाध्यपाकापेक्षया इत्यर्थः । न तु पार्थिवमिति । पृथिवीमूलकारणं परमाणुरित्यर्थः । कार्येति । कारणनाशस्य कार्यनाशहेतुत्वा-

(१) कार्यद्रव्य–इति (क) पु.
(२) अपक्वत्वात्—इति (क) पु.



दित्यर्थः । द्व्यणुकेति । तस्यैव साक्षात्परमाणुजन्यत्वादित्यर्थः । जातीति । द्व्यणुकानां बहुतया बहुवचनस्योचितत्वेऽपीति शेषः । कर्मसु विभाग इत्यत्र विभागाजन्यो विभागो विवक्षितः । न हि चन्द्रचक्षुषोरिति । ननु तथेत्यनेन पाककारणताविशेषनिषेधो न युक्तः, तयोरनुद्भूतस्पर्शतया सामान्यत एव पाककारणत्वाभावात्, उद्भूतस्पर्शस्यैव तेजसः पाककारणत्वात् ।

अत्राहुः । पाकसामान्ये लाघवात् उष्णस्पर्शः सामान्य(१)कारणम्, अग्न्यादिनिष्ठोद्भूतोष्णस्पर्शः पाकविशेषे । किं च यद्विशेषयोः कार्यकारणभावो बाधकं विना तत्सामान्ययोरपि तथात्वम् । अतश्चन्द्रचक्षुषोरपि पाकसामान्ये कारणत्वमिति तद्विशेषे निषेधो(२) युक्तः ।

अन्ये तु । कार्यकारणभावस्यान्वयव्यतिरेकसमधिगम्यत्वात् अनुद्भूतस्पर्शान्वये च रूपपरावृत्त्यदर्शनात् उद्भूत एवोष्णस्पर्शः पाककारणम् । ग्रन्थश्चैवं योजनीयः चन्द्रचक्षुषोस्तथा तेजो नास्ति यथा सौरम् । कुतः पाचकम् । यथा सौरम् । हि शब्दो हेतावित्यर्थः । यद्वा चन्द्रादेस्तेजोऽपाचकं यत इत्यर्थो नेय इत्यर्थः ।

अविचारितेति । आगमः श्यामरूपप्रवाहोऽनादिरित्येतत्परो नत्वेकस्याः श्यामव्यक्तेस्तत्त्वपर इत्याहुः ।

अन्यथेति । अनादेर्भावस्य नित्यत्वादित्यर्थः । संक्षेप-

(१) सामान्यं—इति (क) पु० ।
(२) तद्विशेषनिषेधो—इति (क) पु०

णोति । अवान्तररूपत्वरसत्वाद्यविवक्षया सामान्यस्यैव विवक्षितत्वादित्यर्थः । नन्वेक एवाग्निसंयोगोऽपूर्वरूपादेरुत्पादकोऽन्यस्य तस्य नाशकोऽस्तु । न चैकस्योत्पादकत्वनाशकत्वे विरुद्धे । एकदोत्पाद्यनाश्यव्यक्तिभेदेन तयोरविरोधात् । यथैक एव शब्दः पूर्वशब्दं नाशयत्युत्तरं चोत्पादयति । कालभेदाद्वा तयोरविरोधः । यथोपान्त्यशब्द एकदान्त्यं शब्दं जनयिष्यति अन्यदा तमेव नाशयती(१)त्याह—यद्यपीति ।

अयं विधिरिति । व्यक्तिभेदेनैकस्योत्पादकत्वनाशकत्वे कालभेदेन चेत्यर्थः । कार्यविनाशेति । न चात्र मानाभावः । अवयवरूपादिसमानकाल(२)व्याप्यत्वादवयविरूपादेः सति(३) कार्यद्रव्ये परमाणुरूपादिनाशेऽवयवरूपाद्यभावेऽपि अवयविरूपादिस(४)द्भावात्तद्भङ्गापत्तेः । एकपरमाणुपाके च(५) कार्यद्रव्यानवष्टब्ध एवाश्रयेऽग्निसंयोगस्य नाशकत्वावधारणात्, अन्यत्रापि तथानुमानात्, सर्वप्रदेशावच्छेदेनाग्निसंयोगस्यैव रूपाद्युत्पादकतया तादृशस्यैव (६)नाशकत्वाच्च । न चेदमसिद्धम् । एकपरमाणुपाके तथा दर्शनात्, परमाण्वन्तरसंयुक्ते च परमा-

(१) अन्त्यशब्दं जनयति—इति (क) पु० ।
(२) समकालत्व—इति (क) पु० ।
(३) सति च—इति (क) पु० ।
(४) सद् इति (क) पुस्तके नास्ति ।
(५) च—इति (क) पुस्तके नास्ति ।
(६) तस्य—इत्यधिकं (क) पु० ।



णौ तादृशाग्निसंयोगाभावात्, मूर्तानां समानदेशताविरोधात् । तथा च परमाण्वन्तरसंयोगस्य द्व्यणुकासमवायिकारणस्य नाशे सति द्व्यणुकध्वंससमये योऽग्निसंयोगस्ततो रूपादिनाश इति स्थितम् ।

सति चेति । एकदैकस्मिन्नाश्रये नानारूपाननुभवादित्यर्थः । न चैतावन्तमिति । यदा द्व्यणुकासमवायिकारणसंयोगनाशकविभागजनकं कर्म तदैतत्कर्म(१)जनकाग्निपरमाणुसंयोगजनककर्मणो विनाशः, तदुत्तरक्षणे पुनरग्नौ कर्म, ततो विभागः, ततो द्व्यणुकनाशसमकालमग्निपरमाणुसंयोगनाशः, ततो द्व्यणुकनाशकेनाग्निसंयोगेन परमाणुरूपनाशो वाच्यः(२)। द्व्यणुकनाशकश्चाग्निसंयोगो न तावत्कालमनुवर्तत इति न तस्माद्रूपादिनाश इत्यर्थः । ननु तस्य संयोगस्य तावत्कालानवस्थानेऽपि द्व्यणुकनाशसमकालोत्पन्नापराग्निसंयोग एक एवापररूप(३)पूर्वरूपाद्युत्पादविनाशौ जनयत्वित्यत आह—अपि चेति । यद्येकोऽग्निसंयोगो रूपाद्युत्पाद्य विनाशयति तदा यदैव रूपादिकमजीजनदग्निसंयोगस्तदैव विनाशयेदिति घटादिर्नीरूपः स्यादित्यर्थः । ननूत्पादितं रूपादि विनाश्याग्निसंयोगो रूपाद्यन्तरं जनयिष्यति । न च तस्यापि ततो नाशप्रसङ्गः । तदुत्तरमग्निसंयोगस्यैवोच्छेदात् ।

(१) तदैव तत्कर्म इति (क) पु०
(२) वाच्य इति नास्ति (क) पु० ।
(३) अपररूप-इति नास्ति (क) पु० ।

अत्राहुः । कर्मणः स्वजन्योत्तरदेशसंयोगनाश्यत्वाद्यदाग्निसंयोगेन स्वजनककर्मणो नाशस्तदैव श्यामादिनाशोऽथ रूपाद्यन्तरोत्पत्तिस्तदग्नौ कर्मान्तरोत्पत्तिश्चेत्येकः कालः । ततो यदैवं रूपाद्यन्तरोत्पादकाग्निसंयोगेन रूपाद्यन्तरस्य नाशस्तदैव कर्मान्तरेण रूपाद्यारम्भकसंयोगाविरोधिविभागोत्पत्तिः । तथा च पुनस्तत्र रूपाद्यन्तरोत्पत्तिकाले विभागेन रूपाद्यारम्भकसंयोगनाश इति कुतो रूपाद्यन्तरोत्पत्तिरिति घटादेर्नीरूपत्वप्रसङ्गः कार्यसमानकालस्यैवाग्निसंयोगस्यासमवायिकारणत्वनियमात् । अ(१)थैक एवाग्निसंयोगो रूपादि विनाश्य तदुत्पादयति तत्राह—विनाशकस्यैवेति । कारणतारतम्यं विना कार्यतदनुत्पत्ते(२)रित्यर्थः । यद्यपि पूर्वपूर्वाग्निसंयोगेन तत्तद्रूपादिनाशद्वारा चिरकालाग्निसंयोगेन भावि(३)रूपान्तरस्य जनने पाकतारतम्यमुपपद्यत एव तथापि श्यामादिनाशकस्यैवाग्निसंयोगस्य रूपान्तरोत्पादकत्वे सिन्दूरादौ चिरकालाग्निसंयोगाल्लौहित्यादितारतम्यमनुभूयमानं न स्यादित्यत्र तात्पर्यम् ।

नन्वन्याग्निसंयोगः (४)श्यामभिन्नं रूपं विनाश्य रूपान्तरं जनयतीति न पाकतारतम्यानुपपत्तिरित्यत आह—पुनस्ते-

(१) अथवोत्पाद्यविनाशकत्वे हि श्यामतादिनाशो न स्यात् तन्नाश एव रूपाद्यन्तरोत्पादात्—इत्यधिकं (क) पु०

(२) तदनुपपत्तेः—इति (क) पु०

(३) संयोगभावि—इति (क) पु० ।

(४) अन्योऽग्निसंयोगः—इति (क) पु०



नैवेति । पूर्वदोषेति । घटादेर्नीरूपत्वप्रसङ्ग इत्यर्थः । तस्मात्परमाणुष्विति । नन्वेतदप्रकृतं न त्वेकस्यैव रूपस्योत्पत्तिविनाशावेकेनैवाग्निसंयोगेन जन्येते इत्युपक्रान्तं । किं तर्हि(१) पूर्वोत्तररूपव्यक्त्योरेक एवाग्निसंयोगो नाशक उत्पादकश्चेति । न च तदभाव एवात्र साध्यः । दृष्टान्तस्य साध्यविकलत्वात् । श्यामाद्युत्पत्तिविनाशयोरप्येकाग्निसंयोगाजन्यत्वासिद्धेः ।

अत्राहुः । परमाणौ रक्तरूपमेतत्पूर्वनाशकाग्निसंयोगभिन्नाग्निसंयोगजन्यं पार्थिवपरमाणुरूपत्वात् एतत्परमाणूत्तरकालभाविरूपवत् । एवं तत्तत्पूर्वरूपाण्यपि पक्षीकृत्यानुमेयम् ।

यद्वा परमाणुरूपनाशो न रूपजनकाग्निसंयोगजन्यः रूपनाशत्वात् अवयविरूपनाशवत् । न चावयविवृत्तित्वमुपाधिः । उक्तविपक्षबाधकाद्धेतोः साध्यव्याप्यतया तदव्यापकत्वेनोपाधेः साध्याव्यापकत्वात् । एवं परमाणुरूपोत्पत्तिं पक्षीकृत्य रूपनाशाशकाग्निसंयोगाजन्यत्वमनुमेयम् । ननु यदि रूपादेरुत्पादको नाशकश्चाग्निसंयोगो मिथो भिन्नस्तदा कदाचिदुपान्त्याग्निसंयोगोत्पादिते रूपेऽन्त्याग्निसंयोगेन नाशिते नीरूपोऽपि घट उत्पद्येत । न चोपान्त्याग्निसंयोगो रूपादिनाशक एवेत्यन्त्यः स तदुत्पादक एवेत्यत्र नियामकमस्ति नाशकस्यैवोत्पादकत्वे तु नायं दोषः ।

मैवम् । अव्यवहितोत्तरक्षणभाविरूपप्रागभावसहितस्यैव(२)

(१) किन्तु—इति (क) पु०

(२) तस्य—इत्यधिकं—(क) पु०

पूर्वरूपनाशकत्वात् । कार्यद्रव्यं नश्यतीत्यत्र प्रागुक्तप्रमाणमाह—एतेनेति । घटनाशानन्तरं तद्रूपनाशे(१) तथावधारणादित्यर्थः ।

ननु यथा द्रव्यनाशे क्वचित्समवायिकारणनाशः क्वचिदसमवायिकारणनाशश्च हेतुस्तथावयविरूपादिनाशे(२)प्याश्रयनाशवदग्निसंयोगोऽपि हेतुः स्यादित्याह—नन्विति । अग्निसंयोगादवयविनि कतिपयावयवपाको वा स्यात् सकलावयवपाको वा ? नाद्य इत्याह—कतिपयेति । अवयवायविनोरेकजातीयरूपवत्त्वानियमादित्यर्थः ।

अन्त्ये त्वन्यत्र क्लृप्ताश्रयनाश एव तन्नाशक इत्याह—निःशेषेति । तद्रूपादेरिति । अवयविरूपादेरित्यर्थः । अवयविपाकपक्षेऽपि नियममुपपादयन्नाह—अग्निसंयोगादिति । यत्रेति । अनन्यथासिद्धान्वयव्यतिरेकाभ्यां तथावधारणादित्यर्थः । आमदशायामिति । तदानीमग्निसंयोगाभावादित्यर्थः । पाकादेवेति । करणव्युत्पत्त्याग्निसंयोगादेवेत्यर्थः आश्रयनाशादेवेति । अवयविपाकमते कदाचिदग्निसंयोगादवयविरूपादि(३) नाशाच्चन्निष्टत्त्यर्थमेवेत्युक्तम् । यद्यप्यग्निसंयोगादप्यवयविरूपादिनाशः सम्भवति, एवमग्रेऽपि तस्य तेषामुत्पादकत्वम्(४) तथापि यत्राग्निसंयोगस्य नोत्पादकत्वं तत्र नाशकत्वमपि नेति

(१) रूपादिनाश—इति (क) पु० ।
(२) अवयविनाशे—इति (क) पु०
(३) आदि—इति नास्ति (क) पु० (४) च—इत्यधिकं (क) पु०



प्रागुक्तमाश्रित्येदमुक्तम् । अयं पार्थिवोऽवयवी द्रव्यनाशजन्यध्वंसप्रतियोगिरूपादिमान् अवयवरूपजन्यरूपवान् वा परमाणुभिन्नरूपित्वात् जलावयविवत् । यद्वा आमश्यामघटरूपनाशः आश्रयनाशजन्यः अग्निसंयोगाजन्यो वा घटरूपनाशत्वात् स्फुटितघटरूपनाशवदित्यत्र तात्पर्यम् ।

आश्रयनाशे मानमाह—घटादीति । अवयविपाकेऽपि कदाचिदग्निसंयोगो द्रव्यनाशक इति सिद्धसाधनमित्यत उक्तम्—नियमेनेति । अग्निसंयोगत्वादिति । अग्निसंयोगमात्रस्य व्यभिचारित्वेऽपि सकलावयवावच्छिन्नाग्निसंयोगत्वादित्यर्थः । अणुष्वित्यत्राणुपदस्य द्व्यणुकपरत्वम् । सतिसप्तमीभ्रमपाकरोति—परमाणूनामिति । सर्वत्रावयविरूपादौ नावयवरूपादीनां कारणत्वमित्युपपादयति—अत्र चेति । वायावपीति । यद्यपि रूपात्मककारणान्तराभावादपि वायौ रूपाभावः सम्भवति । तथापि रूपानपेक्ष(१)स्पर्शस्य यदि रूपजनकत्वं तदेतत् दूषणम्(२) । तदपेक्षत्वे च स्पर्शस्य हेतुत्वे मानाभाव इति मन्तव्यम् । एव(३)मग्रेऽपि । रसस्य रूपोत्पत्तिं प्रति व्यभिचारेऽपि(४) दूषणान्तरमाह—रसादेरिति । रसरूपयोरन्यतरानुद्भवेऽप्यन्यतरोद्भवो न स्यादित्यर्थः तदनुकारापत्तेश्चेति ।

(१) स्य—इत्यधिकं (क) पु० ।
(२) तदेवं दूषणम—इति (क) पु० ।
(३) इत्थम—इति (क) पु० ।
(४) अपि—इति नास्ति (क) पु० ।

तदुद्भवाद्यनुविधानापत्तेरित्यर्थः । इत्यादीति । रसाद्गन्धोत्पत्तौ जलेऽपि गन्धप्रसङ्गः गन्धाद्रसाद्वा रूपोत्पत्तौ जलतेजसोर्नीरूपत्वप्रसङ्ग इत्यादिपदसंग्राह्यम्

द्रव्यारम्भेति । तन्त्वादौ रूपादिमत्येव कार्योत्पत्त्यनुगुणक्रियादर्शनात्तथा व्याप्तिग्रहादित्यर्थः । द्रव्यारम्भेति स्वरूपमात्रकथनम् । अवयवि(१)क्रियामात्रस्यैव रूपादिमत्युत्पत्तिधारणात् । कारणान्तरापेक्षत्वादिति । नोदनाभिघातापेक्षत्वादित्यर्थः । तथा च तदुत्पत्तिसमय एव रूपाद्युत्पत्तिरिति भावः । यद्यप्येकपरमाणुपाके रूपरहितेऽपि तादृशक्रियोत्पत्तिस्तथापि प्रकृतद्रव्यारम्भकपरमाणुमभिप्रेत्य द्रव्यारम्भानुगुणेत्युक्तम् । ननु घटादीनामपि दृढत्वेन तत्राणुप्रवेशोऽनुपपन्न इत्यत आह—सान्तराण्येवेति । स्पन्दनेति । अन्तर्निहितस्याविभक्तावयवाधारतया विभागः स्पन्दनम् । अविनष्टावयवस्य बहिरवयवेनान्तर्निहितद्रव(२)द्रव्यसंयोगः स्रवणम् । नन्वग्निसंयोगमात्रान्न कार्यनाश(३)इत्यत आह—ईदृशे(४)हीति । व्यूहः संस्थानम् । अन्यथेति । यद्यग्निसंयोगो न पूर्वव्यूहप्रच्यावक इत्यर्थः । तथेति । व्यूहान्तरापत्तिदर्शनादित्यर्थः । आशुविनाशिनामिति । क्रमभाविनामिति शेषः । घटादिपाकेऽपीति ।

(१) अवयविनि—इति (क) पु० ।
(२) द्रव-इति (ख) पु० नास्ति ।
(३) कार्यद्रव्यनाश—इति (क) पु० ।
(४) ईदृशो—इति (क) पु० ।



घटादिपाके क्वचिन्मृदुत्वं नश्यति कठिनत्वं(१)चोपजायते क्वचिच्च विपरीतमित्यनुभवसिद्धम् । तौ च न स्पर्शभेदौ, चक्षुषापि तत्प्रतीतेः, किन्त्ववयवसंयोगभेदावेव । ततश्च पूर्वावयवसंयोगनाशेऽवयविनाश आवश्यक इत्यर्थः ।

एतेनेति । वस्तुतः प्रत्यभिज्ञानं गकारादाविव तज्जातीयविषयत्वेनाप्युपपन्नं पूर्वावयविनाशस्योक्तयुक्त्या प्रामाणिकत्वेन तथा कल्पनात् । तावदवयवेति । तावदवयवव्याप्तियोग्यपरिमाणवत्कार्यद्रव्यं किञ्चिदवयवनाशे सति अविनश्यदवस्थं सदितरावयवेषु न वर्तते । अन्यथा पूर्ववदेव तावद्देशव्यापकं परिमाणमुपलभ्येतेत्यर्थः । संकोचः किं परिमाणस्य नानात्वमुत विनाशः ? तत्र नाद्य इत्याह—स हीति । स संकोचः । तयोर्दृष्टान्तः । संवृत(२)परिमाणदार्ष्टान्तिकपरिमाणयोर्न भेदो नानात्वम् । कुतोऽभेदस्य द्रव्यधर्मत्वादित्यकारप्रश्लेषात् । द्रव्यस्य हि तत्राभेदो धर्मोऽभिन्नं द्रव्यमिति यावत् । न चाभिन्ने द्रव्ये परिमाणद्वयं वर्तत इत्यर्थः । अन्त्यमाशङ्क्य निराकरोति—न विनाश इति । परिमाणवति परिमाणान्तरानुत्पत्तेः । पूर्वपरिमाणस्याश्रयं विना विनाशानुपपत्तेरिति वयम् ।

सम्प्रदायविदस्तु । सम्भेदपरिमाणसंकोचात्मको न तयोर्दृष्टान्तदार्ष्टान्तिकपरिमाणयोर्भेदस्य संकोचस्य संयोगविशेषतया द्रव्यधर्मत्वात् परिमाणस्य च संयोगात्मक(३)कार्यानाश्रयत्वात् ।

(१) काठिन्यं—इति (क) पु० । (२) पट--इत्यधिकं (क) पु० ।
(३) संयोगविशेषात्मक—इति (क) पु० ।

यद्वा संवृतपटेन तयोर्नम्रयोरवयवयोर्भेदो विशेषः संयोगलक्षण इत्यर्थ इत्यन्ये ।

**आश्रयेति** । परिमाणस्य(१)य आश्रयोऽवयवी तदवयवस्य क्वचिन्नाशात् क्वचिद्विश्लेषात् तत्परिमाणं नश्यति द्रव्यमिव समवाय्यसमवायिनाशाभ्यामित्यर्थः । **अवयवेति** । तथा चासमवायिकारणस्य नाशाद्द्रव्यनाश एव स्यादित्याश्रयनाश एव परिमाणनाशकः । आश्रयाश्रयनाशापेक्षया लघुत्वादित्यर्थः । **नोदनादिक्रमेणेति** । अग्निकर्मणारब्धद्रव्यपरमाणावग्निसंयोगो नोदनाख्यः, ततः परमाणौ कर्म, ततो द्व्यणुकारम्भकपरमाण्वन्तरेण विभागः, ततो द्रव्यारम्भकसंयोगनाशः, ततो द्व्यणुकनाश इत्यर्थः ।

अत्र दशक्षणायां प्रक्रियायां यदैव द्व्यणुकनाशस्तदैव द्रव्यारम्भकसंयोगनाशकविभागेन पूर्वाकाशदेशविभागः, यदैव श्यामादिनिवृत्तिस्तदैवाकाशविभागेनाकाशसंयोगनाशः, यदैव रक्तोत्पत्तिस्तदैवोत्तरसंयोग इति व्यवस्था ।

एकादशक्षणायां तु श्यामादिनिवृत्तिसमकालमाकाशविभागः, रक्तोत्पत्तिसमय एवाकाशसंयोगनाशस्तत उत्तरदेशसंयोग इत्येकक्षणवृद्धिः ।

**द्वित्रिक्षणेति** । एकत्र परमाणावग्निसंयोगोत्पत्तिसमकालं परमाण्वन्तरे कर्मोत्पन्नं तदा(२) द्व्यणुकनाशमपेक्ष्य द्विक्षणा । तदा ह्येकत्र क्रमेण कर्मविभागद्रव्यारम्भकसंयोगनाशद्व्यणुकनाशाः, अन्यत्र विभागपूर्वसंयोगनाशोत्तरसंयोगद्रव्योत्पत्तिगुणोत्पत्तयः । यदा त्वेकत्र(१) परमाणौ विभागसमकालमन्यत्र परमाणौ कर्म तदा चतुःक्षणेत्येते पक्षा न सम्भवन्तीत्यर्थः ।

( १ ) च—इत्यधिकं (क) पु० ।
( २ ) कर्मोत्पत्तेः—इति (क) पु० ।



**उत्पन्न इति** । अन्यथा तदारब्धद्रव्यस्य निर्गुणत्वापत्तिः । कारणगुणस्य गुणान्तरारम्भकत्वादित्यर्थः । **एवमिति** । पक्वपरमाणुभ्यामेवोक्तक्रमेणारम्भवादित्यर्थः ।

**न शरीरगुणा इति** । न शरीरविशेषगुणा इत्यर्थः । अतो न द्वित्वादिना व्यभिचारः । **अयावद्द्रव्यभावित्वादिति** । समानाधिकरणध्वंसप्रतियोगित्वादित्यर्थः । **प्रत्यक्षत्वादितीति**(२) । यद्यपि परमाणुविशेषगुणानामपाकजत्वेऽपि प्रत्यक्षत्वादिति हेतुरुपपद्यत एव । (३)तथापि सुखादयो न पार्थिवपरमाणुगुणा अपाकजविशेषगुणत्वाच्छब्दवादित्यभिप्रेतम् । प्रत्यक्षत्वादिति तु यदा परमाणुगुणत्वं निरस्यते तदा प्रत्यक्षत्वादित्यपि हेतूकर्तव्यमिति स्फोरणायेति संप्रदायविदः ।

नन्वेकादिव्यवहारहेतुत्वमव्यवह्रियमाणसंख्यायामसिद्धं तद्योग्यतायाश्च तदवच्छेदकरूपाज्ञानेऽज्ञानात् , ज्ञाने वा तदेव ल-

( १ ) परमाणौ कर्मसमकालं परमाण्वन्तरे कर्म तदा द्व्यणुकनाशमपेक्ष्यशमपेक्ष्य त्रिक्षणा । एवमेकत्र—इति (क) पुस्तकेऽधिकम् ।

( २ ) प्रत्यक्षत्वादिति—इत्येव (क) पुस्तके ।

( ३ ) तथापि सुखादयो न परमाणुविशेषगुणा इति साध्यते तदाऽपाकजत्वादिति । यदा तु—इति (ग) पुस्तके ।

क्षणमस्तु संख्यास्वरूपग्राहकमानाभावात् आश्रयासिद्धिश्चेत्यत आह- व्यवह्रियत इति । एकादिज्ञानासाधारणकारणविषयो गुणः संख्येति लक्षणं प्रत्यक्षं च प्रमाणमित्यर्थः । न च प्रत्येकसमुदायाभ्यामव्याप्तिः । अनेन संख्यात्वजातेरुपलक्षणात् (१) एकादौ संख्यातमित्यबाधितानुगतव्यवहाराच्च तत्सिद्धिः । न चेति । सांप्रतमित्यग्रेतनेनान्वीयते । एकप्रत्यय इति । अनेन घटादिभिन्नसंख्याग्राहकं प्रत्यक्षमेवोपन्यस्तं न त्वनुमानम् । अत एवाग्रे संख्याग्राहकप्रत्यक्षानुग्राहकस्तर्को दर्शित इति वक्ष्यति । तेनैकप्रत्ययो यदि घटादिप्रत्ययो विवक्षितस्तदातिरिक्तविषयत्वसाधने बाधोऽथ घटादिभिन्नविषयस्तदाश्रयासिद्धिरित्यनुमानदूषणमपास्तम् ।

नन्वेकत्वं सत्तावज्जातिरस्तु एकमेकमित्यनुगतमतेर्जातिविषयकत्वात्, गुणविषयकत्वे तु परम्परासम्बन्धैक(२)वृत्तिजातिस्तन्निमित्तं वाच्यम्, तद्वरं जातिविषयैव सा भवतु । न च सत्तया सहान्यूनानतिरिक्तविषयत्वं तत्र बाधकम् । एकत्वं जातिः सत्ता गुण इति वैपरीत्यस्यापि संभवात् । न च द्वित्वासमवायिकारणतया एकत्वगुणसिद्धिः । एकपृथक्त्वेनान्यथासिद्धेः । न चैवं द्वित्वद्विपृथक्त्वयोः सामग्र्यभेदः । अवधिज्ञानस्याधिकस्य द्विपृथक्त्वकारणत्वात् ।

अत्राहुः । एकत्वान्यगुणाविषयः शाब्द एकप्रत्ययो गुणविषयकः एकप्रत्ययत्वात् चाक्षुषैकप्रत्ययवत् । तस्य रूपादिगुणविषयकत्वात्, शाब्दस्य च तस्य तदविषयकत्वात् । यद्वा द्वित्वम् एकवृत्तिवृत्ति(१)गुणत्वव्याप्यजातिमत् अपेक्षाबुद्धिजन्यत्वात् पृथक्त्ववत् । न चाप्रयोजकत्वम् । एकत्वस्य जातित्वे द्रव्यमेतत् सदितिवत् द्रव्यमेतदेकमिति प्रत्ययापत्तेः ।

ननु संख्या न गुणः, वस्तुमात्र एवैकादिव्यवहारात् । गौणमुख्यभावस्य च दुर्निरूपत्वात् । द्वित्वादेस्त्वपेक्षाबुद्धिव्यङ्ग्यत्वमतः पदार्थान्तरमेव ।

अत्राहुः । द्वित्वाद्यपेक्षाबुद्धिजन्यं(२) कार्यत्वे सति नियमेनैकप्रतिपत्तृवेद्यत्वात् सुखवत् । कार्यत्वेन विशेषणान्न ज्ञानप्रागभावादिना व्यभिचारः । न चाप्रयोजकत्वम् । अपेक्षाबुद्धिविशेषाणां द्वित्वादिव्यञ्जकत्वे द्वित्वद्विपृथक्त्वादेः(३) प्रतिनियतव्यञ्जकव्यङ्ग्यत्वानुपपत्तेः । एकावच्छेदेन समानदेशयोः समानेन्द्रियग्राह्ययोः प्रतिनियतव्यञ्जकाभावनियमात् । अवयव्यवयवसंयोगयोर्व्याप्याव्याप्यवृत्तित्वेन उत्पलत्वस्य च नीलरूपापेक्षयाऽधिकदेशवृत्तित्वेनै(४)कावच्छेदेन वृत्त्यभावात् । बहुत्वव्यञ्जकव्यङ्ग्यत्वं चावयव्येकत्वयोरिति न मिथो व्यभिचारिव्यञ्जकव्यङ्ग्यत्वम् । अत एव नीला बलाकेत्यत्र दूरत्वेन परिमा-

---

(१) उपलक्षणत्वात्—इति (क) पु० ।

(२) एकत्व—इति (क) पुस्तके ।



(१) एकवृत्तिगुणवृत्ति—इति (ख) पु०

(२) बुद्धिजं—इति (क) पु०

(३) द्वित्वत्रित्वादेः—इति (ख) पु०

(४) अधिकव्याक्तिकत्वेन—इति (ख) पु०

णाग्रहे रूपग्रहाद्रूपपरिमाणयोरर्द्धनिखातवंशसंख्यापरिमाणयोश्च न व्यभिचारः । रूपादिष्वपीति । स्वरूपभेदस्य तत्रापि(१) सत्त्वादित्यर्थः ।

अथ स्वरूपभेदविशेषो द्वित्वव्यवहारहेतुस्तत्राह—घटादावेवेति । घटाद्यतिरिक्तस्य विशेषस्याभावात् । भावे वा स एव द्वित्वादिसंख्येत्यर्थः । **भिन्नानामिति** । भिन्नानां द्वित्वत्रित्वादीनामभिन्नबुद्ध्युपग्रहस्य समुच्चयबुद्धिमात्रस्याविशेषात् त्रिचतुरादिविचित्रव्यवहारो न स्यादित्यर्थः । **अन्यथेति** । नानैकत्वविषयस्याविशेषादित्यर्थः(२) । **न स्यादिति** । संख्याया गुणत्वाद्गुणादाववृत्तेरित्यर्थः । **सामान्यद्वारैवेति** । द्वावेतौ द्वावेतावित्यनुगतः प्रत्ययः प्रत्येकविश्रान्तैर्द्वित्वादिभिः कर्तुमशक्य इति द्वित्वगुणवृत्तिसामान्येन परम्परासम्बन्धात्कर्तव्यः । द्वित्वादीनां सामान्यरूपत्वे तु तैः साक्षात्सम्बन्धादेव भवतीति लाघवमित्यर्थः । **अविरोधादिति** । यदि द्वित्वादिकं जातिः स्यात्तदा द्वयमिदं द्रव्यमित्यत्रेव द्वयमिदं त्रयमित्यत्रापि विरोधो न स्यादित्यर्थः ।

यद्वा द्वित्वादेर्जातिरूपत्वे इदं द्रव्यमितिवदिदं द्वे इति प्रतीतिविषयत्वं स्यात् । जातेः प्रत्येकं विश्रान्तेः । तथा चैतद्घटद्वित्वं नैतत्सामान्यम् एतद्घटातिरिक्तद्रव्याविषयप्रतीत्यविषयत्वात्

(१) अपि—इति नास्ति (क) पु० ।

(२) नानैकत्वविषयत्वस्येत्यर्थः—इति (क) पु०



संयोगवत् । यद्येतद्घटाद्वित्वमेतद्घटसामान्यं स्यादेतद्घट(१)मात्रेन्द्रियसन्निकर्षवेद्यं स्यादिति विपक्षे बाधकमित्यर्थः । विरोधादिति पाठः सुगम एव । **परापरेति** । द्वित्वादिकं यदि सत्ताद्रव्यत्वभिन्नं सामान्यं स्यात् द्रव्यत्वसमानाधिकरणात्यन्ताभावप्रतियोगि स्यादिति । यावद्द्रव्यवृत्ति न स्यादित्यर्थः । **अन्यूनेति** । द्वित्वं यदि यावत्सद्वृत्ति सामान्यं स्यात् सत्ताभिन्नं न स्यादिति । सत्तया सहान्यूनानतिरिक्तव्यक्तिकं स्यात् । तादृशं च सामान्यं घटत्वकलशत्ववन्नेष्यत इत्यर्थः । **प्रत्ययेति** । तादृशसामान्यद्वयानभ्युपगमे मानाभावो मूलम् । प्रकृते च सत्प्रत्ययविलक्षणा द्वावित्यादिधीरेव मानमित्यर्थः । **धर्मविरोधमिति** । सत्ताद्वित्वयोर्घटत्वकलशत्ववदन्यूनानतिरिक्तव्यक्तिवृत्तितया विरोधाभावे भेदाभावात् प्रत्ययवैलक्षण्यमेव न स्यादित्यर्थः । **अन्यथेति** । घटकलशबुद्ध्योरभिन्नविषयत्वं घटकलशशब्दयोश्च पर्यायता न स्यादित्यर्थः । एतावता सतर्कं प्रत्यक्षमेव द्वित्वादेः सामान्यादिवैलक्षण्ये गुणत्वे च मानमुक्तम् । **गणितेति** । यद्यपि गणितत्वं न संख्यात्वं जातिस्तदसिद्धेः, एकादित्वं चाननुगतम्, गणितशब्दवाच्यत्वं चातिप्रसक्तम् । तथाप्यनुगतप्रतीतेरननुगतैकत्वादिनोपपादयितुमशक्यत्वादनुगतं संख्यात्वम् । तच्च बाधकाभावाज्जातिः । न चैवं गुणत्वे सतीति व्यर्थम् । त्रयोविंशतिगुणाविषयकगुणविषयकशाब्दानुगतैकत्वादिप्रत्ययादेव संख्यात्वासिद्धेः । न च जातिरूपत्वे

(१) स्यात्तद्घट—इति (ख) पु० ।

रूपत्वाद्यवान्तरसामान्यसम्बन्धाद्रूपादिसंज्ञा भवतीत्यनेन प्रागुक्तेन पौनरुक्त्यम् । तत्र संज्ञाप्रवृत्तिनिमित्तमात्रकथनात् । अत्र त्वितरभेदकत्वकथनात् । लक्षणाबीजमनुपपत्तिमाह—अन्यथेति । प्रत्येकसमुदायविकल्पग्रासादित्यर्थः ।

पृथक्त्वस्यैकानेकद्रव्यवृत्तित्वात्तस्य व्यावर्त्यत्वं न सम्भवतीत्यत आह–संयोगाद्य इति । पृथक्त्वान्यैकवृत्ति(१)वृत्त्यनेकवृत्तिवृत्तिगुणत्वव्याप्यजातिमत्त्वं लक्षणमित्यर्थः । सलिलपरमाणुरूपादीनां नित्यत्वात्तदतिदेशेनानित्यत्वानित्यत्वनिष्पत्ती विरुद्धे इत्यन्यथा व्याचष्टे--सलिलमादिरिति । द्वित्वमादिरिति(२) । नन्वादिशब्दः प्राथम्यवाची प्राथम्यं च द्व्यणुकादिवन्नोत्पत्तिनिरूप्यम् । न हि त्रित्वापेक्षया द्वित्वस्य प्रथममुत्पत्तिनियमः । नापि भूवादीतिवत्पाठनिरूप्यं तेन रूपेण क्वचिदप्यपाठात् । एवमन्तत्वमपि नोत्पत्तिपाठाभ्यां निरूप्यम् ।

अत्राहुः । आदिशब्दोऽत्र प्रकारवाची । प्रकारश्चैकत्वान्यसंख्यात्वम् । अन्तत्वं च परार्द्धस्य स्वव्यापकसंख्याशून्यत्वम् ।

संप्रदायविदस्तु आदिशब्दोऽत्र प्राथम्यवाची प्राथम्यं च द्वित्वस्य समानाधिकरणानेकवृत्तिसंख्याव्याप्यत्वम् , अन्तत्वं च परार्द्धस्य समानाधिकरणयावत्संख्याव्यापकत्वमित्याहुः ।

निष्पत्तिरेवेत्यवधारणं येऽपेक्षाबुद्धिव्यङ्ग्यत्वं द्वित्वादेराहुस्त-

(१) वृत्ति—इति नास्ति (ख) पु० ।

(२) द्वित्वमिति (ख) पु० ।



न्मतनिरासाय—एकत्वे चेति । एकत्वपदात्सामान्यतः सकलैकत्वोपस्थितौ योग्यतया द्वित्वं प्रत्येकत्वे त्रित्वादीन्(१) प्रत्येकत्वानि योज्यानि । अनेकाविषयेति । नानैकत्वगोचरेत्यर्थः । कथमिति । एतदपेक्षाबुद्धेर्द्वित्वादिनिमित्तकारणत्वं कुत इत्यर्थः । तदेव स्फुटयति—अथेति । कारणद्वित्वादिभ्यः कार्यद्वित्वादिकमुत्पद्यते यथैकत्वमित्यर्थः । एकद्रव्यमिति । एकमात्रद्रव्यसमवेतम् । एकत्वे तथा दर्शनादित्यर्थः । त्रित्वादि कं(२) चेति । द्विमात्रावयवारब्धे कारणत्रित्वादेरभावादित्यर्थः । तद्वदेवेति । यथा कारणाकारणवृत्तिसंयोगेनारब्धः संयोगः कार्याकार्यवृत्तिर्न तु कारणवृत्तिस्तथा त्रित्वादिकमपीति द्व्यणुकतत्कारणपरमाणवस्त्रय इति व्यवहारो न स्यादित्यर्थः । कारणमात्रवृत्त्येकत्वस्य द्वित्वाद्यारम्भकत्वे दूषणान्तरमाह—किञ्चेति । एकत्वे विशेषान्तराभावादित्यर्थः । ननु यावति द्वित्वप्रागभावस्तावति द्वित्वं यावति त्रित्वप्रागभावस्तावति त्रित्वमिति प्रागभावभेदात् कार्यभेदः स्यात् । न च प्रागभावेतरसकलकारणाभेदे प्रागभावभेदोऽप्यावश्यकः । अपेक्षाबुद्ध्युत्पाद्यत्वेऽपि द्वित्वादे(३)रस्य दोषस्य तुल्यत्वात् । न चैकत्र कदाचित् द्वित्वं कदाचित् त्रित्वमिति न स्यात् किन्त्वेकदैव द्वित्वत्रित्वाद्युत्पत्तिः स्यात् । इष्टापादनात् । तदपेक्षाबुद्धिक्रमेण-

(१) त्रित्वादीनि—इति (क) (ख) पु० ।

(२) द्वित्वादिकं—इति (क) पु० ।

(३) द्वित्वादेः—इति नास्ति (क) पु० ।

तत्तदभिव्यक्तेः क्रमात् । एतेन नित्यद्रव्येषु द्वित्वादेः सततोत्पत्तिप्रसङ्गोऽपास्त इति दूषणान्तरमाह—द्वित्वद्विपृथक्त्वादेश्चेति । द्वित्वादेः प्रत्येकैकत्वबुद्धिव्यङ्ग्यत्वं द्विपृथक्त्वादेश्च प्रत्येकैकपृथक्त्वबुद्धिव्यङ्ग्यत्वमिति नियतव्यञ्जकव्यङ्ग्यत्वं न स्यादित्यर्थः । यथा चात्र न व्यभिचारस्तथोपपादितमधस्तात् । नन्वपेक्षाबुद्धिजन्यत्वेऽपि द्वित्वादीनां द्वित्वद्विपृथक्त्वयोः प्रतिनियतव्यञ्जकत्वानुपपत्तिस्तुल्या । अथावधिज्ञान(१)मधिकमपेक्ष्य द्वित्वव्यञ्जकैकबुद्धिव्यङ्ग्यत्वं द्विपृथक्त्वादेरिति न परस्पराव्यञ्जकव्यङ्ग्यत्वमित्युच्यते तर्हि द्वित्वादीनामपेक्षाबुद्धिव्यङ्ग्यत्वेऽपि तुल्यम् ।

अत्राहुः । द्वित्वद्विपृथक्त्वादिकं यदि कारणगुणजन्यं स्यादेकत्ववदपेक्षाबुद्धिव्यङ्ग्यं न स्यादित्यापादने तात्पर्यम् ।

तद्विनाशश्चेति । ईश्वरापेक्षाबुद्धेर्नित्यत्वेऽपि तज्जन्यद्वित्वादीनां विनाशोऽप्यपेक्षाबुद्धिनाशादेव, यदुपाधिसमवधानात्तद्बुद्धेरपेक्षाबुद्धित्वं तन्नाशादेव तन्नाशात् । अत्र च द्वित्वाद्य(२)पेक्षाबुद्ध्योर्नियतपौर्वापर्यादेव ज्ञानेच्छयोरिव कार्यकारणभावग्रहः । द्वित्वज्ञान(३)समकालमेव द्वित्वगुणनाशेन तद्ग्राहकस्य प्रत्यक्षस्याभावात् । बुद्धिमात्र इति । विशिष्टबुद्धिमात्र इत्यर्थः । शिष्येति

(१) ज्ञानम—इति नास्ति (क) (ख) पुस्तकयोः ।
(२) द्य—इति नास्ति (क) (ख) पुस्तकयोः ।
(३) द्वित्ववृत्तिसामान्यज्ञान—इति (क) (ख) पु० ।



विषय(१)प्रदर्शनार्थं शिष्यजिज्ञासानुवादः कृत इत्यर्थः । द्वित्वारम्भायेति(२) । एकत्वाभ्यां सहकारिसंपन्नाभ्यां भूयत इत्यर्थः । सहकारित्वं तु तामपेक्ष्येत्यभिधानादपेक्षाबुद्धेरेव लभ्यत इत्याह—द्वित्वारम्भेति ।

ननु तदेत्यस्यापेक्षणक्रियान्वयात्तत्कालीनतदपेक्षाज्ञानानन्तरं कालान्तरे द्वित्वमारभ्यत इत्यन्वय उपपद्यत एव ।

मैवम् । प्रधानक्रियान्वयस्याभ्यर्हितत्वात्तदेत्यारम्भक्रियान्वयमनुरुध्य व्याख्यानात् ।

द्रव्यज्ञानादिति । द्वे द्रव्ये इति ज्ञानात्पूर्वमित्यर्थः । ननु विशिष्टज्ञानं विशेषणज्ञानजन्यं द्वित्वसामान्यनिर्विकल्पकं च द्वित्वगुणविषयमिति तत एव विशेषणज्ञानात् द्वे द्रव्ये इति द्वित्वविशिष्टद्रव्यज्ञानं स्यात् । तदानीं द्वित्वगुणस्य विशेषणस्य विद्यमानत्वात् ।

अत्राहुः । यद्विशेषणविशिष्टस्य यस्य यत्र विशिष्टज्ञाने विशेषणत्वं तद्विशेषणविशिष्टस्यैव तस्य विशेषणस्य ज्ञानं तत्र विशिष्टज्ञाने कारणम् । तथा च द्वित्वत्वविशिष्टस्य द्वित्वगुणस्य विशेषणत्वमिति निर्विकल्पकानन्तरं द्वे द्रव्ये इति विशिष्टज्ञानात् पूर्वं द्वित्वत्वविशिष्टगुणधीर्वाच्या । अतो यदा द्वित्वगुणज्ञानं तदैव निर्विकल्पकादपेक्षाबुद्धिनाशस्ततो द्वित्वविशिष्टद्रव्यज्ञानसमकालं द्वित्वनाश आवश्यक इति भावः । ननु तेनानुविधीयमानत्वं तद-

(१) विशेष—इति (ख) पु० ।
(२) आरम्भायेति (क) (ख) पु० ।

न्वयव्यतिरेकानुविधायकत्वं(१) तच्चापेक्षाबुद्धिव्यङ्ग्यद्वित्वादिनाऽसिद्धमित्यत उक्तम्—व्यञ्जकत्वानुपपत्ताविति । कन्दलीकारमतमास्कन्दति—द्वित्वं बुद्धिजमिति ।

ननु जागराद्यज्ञानं यदि विशिष्टज्ञानं विवक्षितं तदा तस्य निर्विकल्पकजन्यतया व्यभिचारः । प्रयत्नोऽपि कृतिरूपाश्चिकीर्षाद्वारा बुद्धिजन्य एव जागराद्यनिर्विकल्पके जीवनयोनियत्ने च हेतुरेव नास्ति तयोरतीन्द्रियत्वात् । न च सुखप्रागभावादिना व्यभिचारः । गुणत्वेन भावत्वेन वा हेतु(२)विशेषणात् । न चेश्वरबुद्धिजत्वेन सिद्धसाधनम् । जन्यबुद्धिजत्वस्य साध्यत्वात् । नाप्यतीन्द्रियद्वित्वे(३) भागासिद्धिः । प्रत्यक्षसिद्धस्यैव पक्षत्वात् । तदुत्तरमतीन्द्रियद्वित्वे हेत्वन्तरेण बुद्धिजत्वसाधनात् । नाप्यसिद्धिः । न हि वेद्यत्वं ज्ञायमानत्वमात्रं हेतुर्येनानुमानादिना बहुपुरुषवेद्यत्वात् द्वित्वे न स वर्तेत, किन्तु साक्षात्क्रियमाणत्वम् ।

अत्राहुः । यद्यव्यवहितविशिष्टबुद्धिजत्वं(४) साध्यते तदा जागराद्यविशिष्टज्ञानकृतिभ्यामनैकान्तिकम् । अथ बुद्धिजत्वमात्रं साध्यं(५) तदा हेतोरसिद्धिः । कारणगुणात्पूर्वोत्पन्नमेव द्वित्वं

(१) विधायित्वं—इति (क) (ख) पु० ।
(२) हेतोः—इति(क) (ख) पु० ।
(३) अस्य—इत्यधिकं (क) पुस्तके ।
(४) जन्यत्वं—इति (ख) पु० ।
(५) साध्यते—(ख) पुस्तके ।



यस्य यदापेक्षाबुद्धिस्तदा तेन प्रतीयत इति परस्याभ्युपगमात्(१) । एकमात्रपुरुषवेद्यरूपादावनैतिकान्तिकं च । न च प्रतिनियतवेद्यजातीयत्वं हेतुः । तद्धि यदि व्यक्तेर्विशेषणं, तदा जागराद्यनिर्विकल्पकजीवनयोनियत्नाभ्यां व्यभिचारः, जातिविशेषणत्वे चासिद्धिः । परेण द्वित्वादेरनेकपुरुषवेद्यत्वाभ्युपगमात् । संतानवर्तिन्य इति । क्षणचतुष्टयाव्यापिका इत्यर्थः । व्यवधानेति ।

ननु(२) व्यवहारनिवर्तनीयत्वं यदि व्यवधानध्वंसनीयत्वं तर्ह्यसिद्धिः इन्द्रियव्यवधानेन प्रतिबन्धात् ज्ञानान्तरस्यानुत्पत्तेश्च(३) ।

अत्राहुः । ज्ञानान्तरस्य ज्ञानानिवर्त्यत्वे स्थिरविषयेन्द्रियसंनिकर्षे धारावाहिकज्ञानसंतानोपलम्भप्रसङ्गः । न च तत्र ज्ञानान्तरं नोत्पद्यते पूर्वज्ञानेन प्रतिबन्धादिति वाच्यम् । विशिष्टज्ञानानुत्पत्त्यापत्तेः । तथा च समानाधिकरणविशेषगुणानाश्यत्वे बुद्धीनां युगपत् स्थिरविषया नानाबुद्धयोऽनुव्यवसीयेरन्नि(४)ति योग्यानुपलम्भे तात्पर्यम् ।

क्वचिदुभयमिति । निर्विकल्पकं केवलज्ञाननाश्यं तस्य संस्काराजनकत्वात् सुषुप्तिप्राक्कालीनं च ज्ञानं संस्कारनाश्यमेव

(१) परस्योपगमात्—इति (क) पुस्तके ।
(२) ननु—इति (क) पुस्तके नास्ति ।
(३) च—इति (क) (ख) पुस्तकयोर्नास्ति ।
(४) नानुव्यवसीयेरन्—इति (ख०) पु० ।

तस्य ज्ञानाजनकत्वात् । अन्यत्र तूभयनाश्यं प्रत्येकं सामर्थ्यकल्पनादित्यर्थः । अभिव्यञ्जकत्वे प्रागपीति । यद्यप्यपेक्षाबुद्धेर्द्वित्वोत्पादकत्वे व्यञ्जकत्वे(१)च बाधकाभावाद्व्यञ्जकाभावादेवो(२)त्तरकालमग्रहः स्यात् । तथाप्यपेक्षाबुद्धिसत्त्वे द्वित्वान्तरोत्पत्त्यावश्यकत्वात्(३) तेनैव द्वित्व(४)व्यवहारोपपत्तौ पूर्वोत्पन्न(५)द्वित्वसत्त्वं द्वित्वान्तरसत्त्वं चानुपलब्धिबाधितमिति द्वित्वनाश आवश्यक इति भावः ।

द्वित्वमिति । यद्यपि कार्यद्रव्यवृत्तिद्वित्वस्याश्रयनाशान्नाशः नित्यद्रव्यवृत्ति(६)द्वित्वस्य च समानाश्रयपुरुषान्तरापेक्षाबुद्धिजद्वित्वान्तराद्विरोधिगुणान्नाशः सम्भवत्येव । तथापि विद्यमानाश्रयद्वित्वं पक्षः । नित्यद्रव्ये च यदि युगपदुत्पन्नानेकद्वित्वानां मिथो नाशकत्वं तदा तत्र द्वे द्रव्ये इति ज्ञानानुत्पत्तिप्रसङ्गः । उत्तरद्वित्वेन पूर्वद्वित्वनाशाभ्युपगमेऽव्यवहितोत्तरक्षणोत्पन्नद्वित्वानन्तरमेव पूर्वद्वित्वनाशात्स एव दोषः । न चान्यापेक्षाबुद्धिजद्वित्वात्तद्विशिष्टद्रव्यधीः स्यात् । तस्य पुरुषान्तराप्रत्यक्षत्वात् । अन्यथा नानापुरुषापेक्षाधीयुगपज्जनितानेकद्वित्वा-

(१) तद्व्यञ्जकत्वे—इति (क) पु० ।
(२) असत्त्वादेव—इति (क) (ख) पु० ।
(३) आवश्यकत्वे—इति (क) पु० ।
(४) द्वित्व—इति (क) पुस्तके नास्ति ।
(५) पूर्वमुत्पन्न—इति (क) पु० ।
(६) वृत्ति—इति नास्ति (क) (ख) पुस्तकयोः ।



ध्यक्षतापत्तेः । न च यदपेक्षाबुद्धिजं यद्द्वित्वं तदपेक्षाबुद्धिजद्वित्वेनैव(१) तन्नाशः । चरमज्ञानोत्पन्ननित्यवृत्तिद्वित्वस्यानाशप्रसङ्गात् । एवं व्याप्तिसिद्धौ द्वित्वस्य द्वित्वनाश्यत्वानुमानात् । न च द्व्यणुकनाशेन व्यभिचारः । गुणस्य सत इति विशेषणेनैव तन्निरासात् । नाप्यसमवायिकारणनाशनाश्यगुणेन व्यभिचारः । आश्रयपदेन निमित्तकारणान्यकारणस्य विवक्षितत्वात् । असमवायिकारणनाश्यत्वेन हेतुविशेषणाद्वा । न च निमित्तकारणादृष्टनाशनार्थान्तरम् । अपेक्षाबुद्धिनाशस्य योग्यानुपलम्भनिश्चितत्वात् । अदृष्टनाशकल्पनायां च गौरवात् । न चेश्वरापेक्षाबुद्धिजे द्वित्वे तदसम्भवः । यदुपाधिविशिष्टाया अपेक्षाबुद्धित्वं तन्नाशे तस्यापि नाशात् । चरमेति । न च चरमज्ञानं पूर्वबुद्धिनाश्यम् उपान्त्यनाश्यान्त्यशब्दवदिति वाच्यम् । कार्यज्ञानस्य कारणज्ञाननाश्यत्वात्(२) । अन्यथा निर्विकल्पकेन विशिष्टधीनाशे तदप्रत्यक्षतापत्तेः । कथं पुनरिति । यद्यपि विशिष्टज्ञानकाले द्वित्वनाशेऽप्यव्यवहितप्राक्कालवृत्तितया द्वित्वस्य साक्षात्कारविषयतायां च न विरोधः । तथापि प्रत्यक्षं स्वसमानकालीनमेव विशेषणं विषयीकरोतीति नियम इत्यर्थः । न हीति । विशेषणं च द्वित्वं नास्त्येवेत्यर्थः । विशेषणमिति । न च स्वसमयवर्तित्वेन विशेषणस्य विशिष्टाध्यक्ष(३)कारणत्वम् । गौ-

(१) अपेक्षाजन्यत्वेनैव—इति (ख) पु०
(२) कारणज्ञानेन कार्यज्ञाननाशात्—इति (क) पु० ।
(३) विशिष्टाध्यक्षे—इति (क) (ख) पु० ।

रत्वादित्यर्थः । एतच्चोपलक्षणम् । विशेष्यस्यापि न स्वसमयवर्तितया विशिष्टप्रत्यक्षकारणत्वम् । अतएव कारणीभूत(१)कत्वनिर्विकल्पकसमयोत्पन्नककारेण विशेष्यस्य ककारस्य नाशात् कत्वविशिष्टज्ञानक्षणे विशेष्यस्यासत्त्वेऽपि तत्पूर्वक्षणे विशेष्यस्य सत्त्वात् ककारविनाशकालेऽपि कत्वविशिष्टप्रत्यक्षम् । न त्विति । वर्तमानस्यैव प्रत्यक्षज्ञानविषयत्वादित्यर्थः । व्यवच्छेदकस्येति । विशेष्यनिष्ठातद्व्यावृत्तिबोधकस्येत्यर्थः

उपलक्षणस्यापीति । जटाभिस्तापस इत्यादौ जटादेरुपलक्षणस्यापि तथात्वादित्यर्थः । तदेव त्विति । विशेषणभिन्नोपलक्षणस्यानवगमादित्यर्थः । भेदाभेद इति । तथाच भेदमादाय वैशिष्ट्यम(२)भेदमादाय विशेषणत्वमित्यर्थः । विरोधायेति । विरुद्धयोः खल्वभेदं (३)विना एकत्रावृत्तेरज्ञानाच्च । न चात्रावच्छेदकभेदेऽनति(४)प्रसक्तम् । तदभावेऽपि विरुद्धयोरेकत्र वृत्तौ नित्यत्वानित्यत्वादीना(५)मप्येकत्र वृत्तिप्रसङ्ग इत्यर्थः । नियमो नेति । सर्वेषां मिथो विरुद्धानां पक्षाणां सत्त्वे शब्दोऽनित्य एव स्यात् इति(६) नियमो न स्यादित्यर्थः । नूनमिति । नियमोऽप्यनियमाविरोधान्न स्यादिति भे-

(१) कारणीभूत—(क) (ख) पुस्तकयोर्नास्ति ।

(२) वैशिष्ट्यम्—इति (क) (ख) पु० ।

(३) अवच्छेदभेदं—इति (क) (ख) पु० ।

(४) अवच्छेदकमनति—इति (क) (ख) पुस्तकयोः ।

(५) अनित्यत्व—इति (ख) पुस्तके नास्ति ।

(६) एवेत्यादि—इति (क) पु० ।



दाभेदावप्येकत्र न स्यातामित्यर्थः(१) । सर्वमभिन्नमिति । भेदस्य विरोधगर्भत्वात् तदभावे सर्वस्याभिन्नत्वात् सर्वशब्दार्थ एव नोपपद्येतेत्यर्थः । व्यवच्छेदकस्येति । उपलक्षणस्य तु व्यवच्छेदकत्वेऽपि न विशिष्टधीविषयत्वमित्यर्थः ।

समानाधिकरणमिति । ननु सामानाधिकरण्यं नैकविभक्तिनिर्देश्यत्वं प्रयोगस्य वस्त्वव्यापकत्वात् । नाप्यैकाधिकरण्यम् । तद्धि न विशेष्येण, उत्पलनीलरूपयोरेकत्रावृत्तेः । नापि तद्धर्मेण प्रत्याय्य व्यावृत्त्या वा । उपलक्षणस्यापि तत्सत्त्वात् । न हि तापसे जटा न तिष्ठति(२) । केवलान्वयिनः प्रमेयत्वादेर्विशेषणत्वानुपपत्तेश्च । न च व्यावर्तकत्वे सति क्रियान्वयित्वम् । क्रियाहीनेऽयं दण्डीत्यादौ दण्डादेरविशेषणत्वापत्तेः(३) । परम्परयोपलक्षणेऽपि क्रियान्वयाच्च । (४)न चान्वयप्रतियोग्युपस्थापकतयान्वितम् उपलक्षणम् । काकादेः संस्थानाद्युपस्थापकत्वात् । साक्षादन्वितं विशेषणम् अभावे प्रतियोगिनोपलक्षणेन धर्मान्तरानुपस्थानात् । नापि साक्षात्सम्बद्धं व्यावर्तकं विशेषणं परम्परासम्बद्धं तदुपलक्षणम् । रूपवति रस इत्यादौ रूपादेः साक्षात्सम्बन्धेऽप्युपलक्षणत्वात् । लोहितः स्फटिक इत्यादौ परम्परासम्बन्धेऽपि लौहित्यस्य विशेषणत्वात् ।

(१) भेदाभेदावप्येकत्रात एव न स्याताम्—इति (क) पु० ।

(२) वर्तते—इति (क) (ख) पु० ।

(३) दण्डादौ विशेषणतानापत्तेः—इति (ख) पु० ।

(४) क्रियान्वयित्वात्—इति (क) पु० ।

न च व्यावृत्तिबोधसमकालीनं व्यावर्तकं विशेषणम् । द्वित्वस्य स्वविशिष्टज्ञानकालासत्त्वेऽपि(१) विशेषणत्वानुपपत्तेः । उपलक्षणेऽतिव्याप्तिश्चेति ।

उच्यते । यदन्वितितया ज्ञात एव विशेष्ये तात्पर्यविषयीभूतेतरान्वयधीस्तद्व्यवच्छेदकं विशेषणम् , अनेवंभूतं व्यवच्छेदकम् उपलक्षणम् । उपलक्षण नर्कच्छिन्नेऽप्युपलक्ष्ये तात्पर्यविषयान्वयबोधात् । यद्वा यद्व्यावर्तकं विशेष्यान्वयिना अन्वीयते तद्विशेषणं यन्नान्वयि व्यवच्छेदकं तदुपलक्षणम् । अथवा ! प्रत्याय्य व्यावृत्त्यधिकरणतावच्छेदकत्वे सति व्यावर्तकं विशेषणम् । तदन्यव्यावर्तकमुपलक्षणम् । तथाहि दण्डी पुरुष इति ज्ञानानन्तरं दण्डवत्यदण्डव्यावृत्तिरवगम्यत इति प्रत्याय्य व्यावृत्त्यधिकरणत्वं पुरुषे(२)दण्डेनावच्छिद्यते न पुरुषत्वेन, अतिप्रसक्तेः(३) । उपलक्षणस्य तु(४) काकजटादेर्गृहतापसादिनिष्ठप्रत्याय्यव्यावृत्त्यधिकरणता न काकजटादिभिरवच्छिद्यते तदभाववत्यपि व्यावृत्तिप्रतीतेः ।

यद्वा विशिष्टधीहेतुज्ञानविषयत्वे सति व्यवच्छित्तिप्रत्ययसमये विशेष्यतावच्छेदकधर्माश्रयवृत्ति विशेषणं तदन्यत् व्यावर्तकमुपलक्षणम् । काकस्तु(५) यदि व्यवच्छित्तिप्रत्ययसमये

(१) कालासत्त्वेन—इति (ख) पु०।
(२) पुरुषे-इति (क) पुस्तके नास्ति ।
(३) अतिव्याप्तेः--इति (क) (ख) पु०।
(४) तु--इति (क) (ख) पुस्तकयोर्नास्ति ।
(५) काकादिस्तु-इति (ख) पु०।



विशेष्ये वर्तते तदा विशेषणमेव, यदा तु न वर्तते तदोपलक्षणम् । अत एव जटासत्त्वासत्त्वकाले जटावांस्तापसो जटाभिस्तापस इति प्रयोगः । कालभेदेन जटाया विशेषणत्वादुपलक्षणत्वाच्च(१) अन्यथा तृतीयानियमो न स्यात् । अत एव व्यवच्छित्तिप्रत्ययसमये विशेष्ये सत्त्वासत्त्वाभ्यां तदेव विशेषणमुपलक्षणम् । न तु यद्विशेषणं न तदुपलक्षणं यदुपलक्षणं न तद्विशेषणमिति । तत्र च लक्षणायामुपलक्षणत्वं तत्र तत्सार्थवाहित्वतीरादिधर्मोपस्थापनद्वारा गङ्गादेर्व्यावर्तकस्य तदिति ।

अतद्व्यावृत्तिरिति । विशिष्टस्यातद्व्यावृत्त्यधिकरणत्वादित्यर्थः । अनीलव्यावृत्तमिति । वस्तुतो यदनीलव्यावृत्तमुत्पलं तद्भासत इत्यर्थः । न हि नीलोत्पलमिति विशिष्टबुद्धावनीलव्यावृत्तिर्भासते । अपोहवादनिरासात् । किन्तु नीलगुणसम्बन्धमात्रं तदुत्तरं च तद्व्यावृत्तिर्भासते । ननु व्यावृत्तेरव्यावृत्तत्वे कथं तद्योगादतद्व्यावृत्तविशिष्टज्ञानोत्तरमपि भासेत, तत्रापि व्यावृत्त्यन्तरसत्त्वे चानवस्थेत्यत आह—न चेति । तर्किं विशिष्टज्ञाने विशेषणं न क्वचिदपि विषयो नेत्याह—एवं चेति । स्थिरं विशिष्टज्ञानसमकालीनमित्यर्थः ।

वस्तुतो द्वे द्रव्ये इति विशिष्टप्रत्यक्षकाले यद्यपि द्वित्वमसत् तथापि तद्विषयत्वे नैष(२) दोषः । प्रत्यक्षाव्यवहितपूर्वकाले द्वि-

(१) च—इति ( क-ख) पुस्तकयोर्नास्ति ।
(२) एष—इति नास्ति (क) ख) पु० ।

त्वस्य वर्तमानत्वादिन्द्रियसंबन्धाच्च । न च प्रत्यक्षस्य स्वसमानकालीनमात्रविषयकत्वनियमः । विपक्षे बाधकाभावात् । कार्यकारणभावस्य प्राक्कालीनत्वमात्रेणैवोपपत्तेः । ग्रन्थस्तु क्वचिदस्थिरमपीत्यपिशब्दस्वरसान्नेयः । ननु विशेषणतायामिति । स्थिरस्य विशेषणस्य विशिष्टप्रत्यय(१)विषयत्वं क्वचिद्यद्यप्यस्ति तथापि विशेषणत्वे तन्न तन्त्रमित्यर्थः । देवदत्त इत्यादीति । यथान्यत्र विशेषणोपस्थितिर्विशिष्टज्ञानजनकेन्द्रियजन्यैवेति दृष्टमप्यप्रयोजकम् । अन्यथा देवदत्त इत्यादिनामयोजनायां नाम्नोऽपि(२) चक्षुषैवोपस्थितिर्विशिष्टधीप्रयोजिका स्यात् (३)तथा क्वचित्स्थिरं विशेषणं विशिष्टज्ञाने भासितमिति दृष्टमनुपयुक्तमित्यर्थः(३) ।

असमवायिकारणाधीनं विशेषमाह-द्वाभ्यामेकत्वाभ्यामिति । समवायिकारणाधीनं विशेषमाह(४)-द्वाभ्यां द्रव्याभ्यामिति । सत्त्वेऽनवस्थेति । तदपि द्वित्वादिकं स्वोत्पत्तिनियमे द्वित्वान्तरमपेक्षत एवं पूर्वपूर्वमपि तथेत्यनवस्था । पूर्वं द्वित्वादिनैव तद्व्यवहारोपपत्तावन्यत्र द्वित्वादौ मानाभावाद्वैयर्थ्यं चेत्यर्थः । विशेषोऽस्तीति । द्वित्वाद्युत्पत्तिनियामक इत्यर्थः ।

(१) प्रतीति—इति (क) (ख) पु० ।

(२) नाम्नापि—इति (क) पु० ।

(३)-(३) (क) पुस्तके नोपलभ्यते ।

(४) समवायिकारणं विशेषकमाह—इति (क) पु० । समवायिकारणे विशेषमाह—इति (ख) पु० ।



निमित्तकारणविशेषमाह(१)-बुद्धिविशेषादिति । विषयविशेषामिति । अपेक्षाबुद्धौ नानैकत्वात्मकविषयकृतस्य विशेषस्याभावात् प्रत्यक्षत्वादिकं विशेषो वाच्यः स चाप्रयोजकः । अनुमानादिजा(२)पेक्षाबुद्धेरपि द्वित्वाद्युत्पत्तेरित्यर्थः । सैव हीति । समवाय्यसमवायिकारणयोरविशेषे तावत्स्वेव द्रव्ये द्वित्वं त्रित्वं चोत्पद्येतेत्यर्थः । ननु चादृष्टविशेषादपि कार्यविशेषो भवत्वित्यत आह-अदृष्टविशेषेति । दृष्टमुपाधिं समवायिकारणादि(३)विशेषं पुरस्कृत्यादृष्टस्य विशेषकत्वात् । प्रकृते च न तत्संभव इति(४) तावत्स्वेव समवायिनि द्वित्व(५)त्रित्वादिकं चो(६)त्पद्ये(७)तेत्यर्थः । द्वित्वाभिमानादिति । दोषविशेषजन्यो द्वित्वाभिमानोऽत्र विवक्षितः । न च सोऽत्रासिद्धः । द्वित्वाद्यभावप्रमायामपि द्वे रूपे इत्यादिनियतभ्रमजनकतया तत्कल्पनात् । द्वित्वाद्यभिमानमात्रस्य भ्रमरूपस्य रूपादिसाधारणत्वात् । रूपाद्यभावापेक्षयेति । तद्वति तस्यानुत्पादात् स्वप्रागभावो हेतुरिति ।

(१) निमित्तकारणं विशेषकमाह—इति (क) पु० । निमित्तकारणे विशेषमाह—इति (ख) पु० ।

(२) दिना—इति (ख) पु० ।

(३) आदि—इति नास्ति (क) (ख) पु० ।

(४) न चैतत् प्रकृते सम्भवतीति—इति (क) पु० ।

(५) नास्त्येव—इति (ख) पु० ।

(६) द्वित्वं—इति (क) (ख) पु० ।

(७) त्रित्वं चो—इति (क) पु० ।

तस्मात्कार्ये विशेष इत्यर्थः ।

ननु स्वप्रागभाववद्गन्धं प्रति रसादिप्रागभावानां रसं प्रति रूपस्पर्शप्रागभावयो रूपं प्रति स्पर्शप्रागभावस्य विनिगमनाभावेन हेतुत्वात् समानाश्रयकार्यं प्रति समानाश्रयप्रागभावत्वेन कारणतायां सर्वेषामविशेषाच्च कुतस्तत्कृतोऽपि नियमः । किं च प्रागभावेतरसकलहेतुसत्त्वे प्रागभावव्यतिरेकप्रयुक्तकार्यव्यतिरेकेण प्रागभावकारणताग्रहः । कार्यव्यतिरेकश्च पारिशेष्येण(१) प्रागभाव एवेति व्याघातः । प्रागभावाभाववति प्रागभावस्यासत्त्वात् प्रागभावेतरसकलकारणाभेदे प्रागभावाभेदस्यावश्यकत्वाच्च । न च रूपादिध्वंसकृतसामग्रीभेदः । पाकजगन्धादीनां प्रत्येकं प्रति गन्धादिध्वंसानां सर्वेषा(२)मविशेषात् ।

मैवम् । तुल्यरूपरसस्पर्शानामपि विलक्षणगन्धसत्त्वात् विलक्षणरसादीनामपि समानगन्धसत्त्वात्(३) गन्धादीनामन्यतमानुद्भवेऽप्यन्यतमोद्भवाच्च । प्रतियोगिविशेषाहितप्रागभावविशेषस्य कारणत्वे स्वप्रतियोगिककादाचित्काभावस्य ध्वंससाधारणस्य कारणताग्रहात् । अन्येषां प्रागभावानामन्यथासिद्धसन्निधित्वात् । प्रागभावेतरकारणाभेदे च यदि प्रागभावाभेदः स्यात् तदा वेमादीनां वेमादित्वेन सकलपटकारणत्वादेकपटसामग्र्या सर्वपटप्रागभावाभेदे तत्तत्सर्वपटोत्पत्तिप्रसङ्गः । द्वि-

(१) पारिशेष्यात्—इति (क) पु० ।

(२) सर्वेषाम्—इति नास्ति (क) पु० ।

(३) समानगन्धत्वात्—इति (क) पु० ।



त्वाद्युत्पत्तीति । तत्तत्प्रतियोगि(१)विशेषाहितप्रागभावविशेषाहितप्रागभावविशेषात् द्वित्वाद्युत्पत्तिनियमो विवक्षितः । न तु द्वित्वादिध्वंसात् । आद्यद्वित्वाद्युत्पत्तौ तदभावात् । ध्वंसप्रतियोगिद्वित्वादेरेवोत्पत्तौ नियामकाभावाच्च । न चैवं पाकजवदेकदैव सामग्रीसत्त्वात् द्वित्वादिसकलोत्पत्तिः स्यात् । यावति द्वित्वप्रागभावस्तावत्येव त्रित्वादिप्रागभावाभावात् ।

वस्तुतस्तु एकत्वापेक्षाबुद्ध्योरसमवायिनिमित्तकारणयोरविशेषेऽपि समवायिकारणभेदात् द्वित्वाद्युत्पत्तिनियमः । तद्भेदस्योभयसिद्धत्वात् । द्वित्वे भिन्नैकत्वधीर्जनिका त्रित्वादौ तु द्वित्वादिसहितैकत्वबुद्धिजनिकेति निमित्तकारणभेदाद्विशेष इत्यन्ये ।

ननूत्पादितद्वित्वा(२)पेक्षाबुद्ध्या द्वित्वान्तरं कुतो न जन्यते, न चोत्पन्नमेव समानाधिकरणं द्वित्वं प्रतिबन्धकम् पुरुषान्तरापेक्षाबुद्धेरपि तत एव प्रतिबन्धात्, द्वित्वान्तरानुत्पत्तिप्रसङ्गादित्याह—न तर्हीति । यत्पुरुषापेक्षाबुद्ध्या यद्द्वित्वं जनितं तेन यत्पुरुषापेक्षाबुद्धिजन्यमेव द्वित्वं प्रतिबध्यत इति नोक्तदोष इत्याह—तन्नियमेनैवेति । कन्दलीकारमतं(३) दूषयितुमुपन्यस्यति—अथवेत्यादि केचिदित्यन्तेन । शुद्धयेति । सैकैकयेत्यर्थः । बहुत्वमात्रमिति । तहुत्वं च नानै-

(१) तत्प्रतियोगि—इति (क) पु० ।

(२) ननूत्पादितद्वित्वया—इति (क) पु०। त्पादितद्वित्वाश्रये—इति (ख) पु० ।

(३) कन्दलीकारमत—इति नास्ति (क) पु० ।

कत्व(१)विषयापेक्षाबुद्धिजन्यं संख्यान्तरमेव द्वि(२)त्वादिविरोधि। त्रित्वादेर्नियतैकत्वापेक्षाधीजन्यत्वात्। कारणविरोधे कार्यविरोधस्यावश्यकत्वात्। त्रित्वाद्यनिश्चयेऽपि बहुत्वनिश्चयात्। घटत्वादिविशेषेति(३)। सेनावनादौ शतत्वादिसंख्याविशेषाग्रहे बहुत्वमात्रं शतत्वादि विना कृतमित्यत्र मते बहुत्वज्ञाने शतत्वादिसंशयः त्रित्वादौ बहुत्वव्यवहारश्च(४) न स्यात् बहुत्वस्य शतत्वादिविरहव्याप्यत्वात्। यथा घटत्वादिविशेषरहितमृत्तिकामात्रग्रहे घटत्वादिसंशयो(५) न भवति। तस्माद्द्वित्वातिरिक्तसङ्ख्यैव बहुत्वम्। सेनावनादौ तु शतत्वादिकमेव स्वप्रागभावसहितानियतैकत्वापेक्षाबुद्धेरुत्पद्यते। शतत्वादिजातिनिश्चयस्तु न भवति तद्व्यञ्जकनियतैकत्वापेक्षाबुद्धेरभावात्। बहुत्वनिश्चये शतत्वादिसंशयश्च द्वित्वातिरिक्तसंख्यात्वनिश्चयेऽपि तद्विशेषसंशयादित्यर्थः। अङ्गान्तरेति। (६)अङ्गं सेनाङ्गं हस्त्यश्वादि(६)। बहुत्वत्वस्य संख्यात्वव्याप्यजातित्वे स्वसमानजातीयनिरूपितप्रकर्षसामानाधिकरण्यं न स्यादित्यर्थः। तस्मादिति। वस्तुस्थितप्रागभा-

(१) चानियतैकत्व—इति (क) (ख) पु०।
(२) त्रि—इति (क) पु०।
(३) घटादिविशेषेति-इति (क) पु०। घटत्वादीति--इति(ख) पु०
(४) व्यवहारोऽपि—इति (ख) पु०।
(५) विशेषग्रहो--इति (क) पु०।
(६)-(६) नास्ति (क) पु०।



वसहितैकत्वापेक्षाबुद्ध्या जनितं शतं(१) द्वित्वभिन्नसंख्यात्वेन ज्ञायते न शतत्वादिरूपेणेत्यर्थः। (२)तदप्रतीतिरिति। शतत्वादिजात्यप्रतीतिः(२)। स्वाभावपूर्वकत्वादिति। न च प्रागभावस्याकारणत्वम्। उत्पन्नस्य पुनरुत्पत्तिप्रसङ्गात्। न च प्रतियोग्येव प्रतिबन्धकः। कारणीभूताभावप्रतियोगिनः प्रतिबन्धकतया प्रागभावकारणत्व एव पर्यवसानात्। शतं पिपीलिकानामिति। समवायिकारणाभावेन तत्र संख्याया अनुत्पत्तेरित्यर्थः। तेनासमवायिकारणाभावेऽपीति सोपहासमुक्तम्। अतथाभूतान्येवेति। अविद्यमानान्येवैकत्वानीत्यर्थः। विशेषणेति(३)। यथार्थविशिष्टप्रत्यक्षमभिप्रेत्यैतदुक्तम्। विशिष्टप्रत्यक्षसामान्ये(४) विशेष्यसंनिकर्षो विशेषणज्ञानं तयोरसंसर्गाग्रह इत्येतावन्मात्रस्य कारणत्वात्। तथा सतीति। विशिष्टज्ञाने वर्तमाना व्यावृत्तिर्विशेष्ये भासते विशेषणं च स्वसमानकालीनव्यावृत्तधीजनकमतो नातीतस्य तस्य व्यावृत्ति(५) धीजनकत्वमित्यर्थः। ते विशेषणविशेष्यबुद्धी इत्यर्थः। विशेष-

(१) बुद्ध्या जनितशतत्वादिकं—इति (क) पु०। बुद्धिजन्यं शतं—इति (ख) पु०।
(२)-(२) नास्ति (क) (ख) पु०।
(३) विशेषणेति—इति (क) पु०।
(४) च—इत्यधिकं (ख) पु०।
(५) व्यावृत्त—इति (क) पु०।

णस्यासतोऽपि धियः(१) कारणत्वं स्यादित्यन्यथा व्याचष्टे—तद्विशेषणमिति। लिङ्गलिङ्गिनोर्भेद एव गम्यगमकभाव इत्यन्यथा व्याचष्टे—अभेदेनेति। व्यावृत्तिसामानाधिकरण्येनेत्यर्थः। न हीति। न हि शब्दो वीणा न वा(२) नष्टेन शब्देन शब्दवती वीणेति सामानाधिकरण्यम्। तथा न बुद्धिः पुरुषो न वा नष्टायां बुद्धौ बुध्यते पुरुष इति सामानाधिकरण्यमित्यर्थः। बुध्यत इत्यत्र(३) कर्तरि लकाराद्बुद्धिमानुच्यते। गुणज्ञानमिति। द्वित्वत्वविशिष्टद्वित्वगुणज्ञानमित्यर्थः। गुणबुद्धिसमानकालमित्यत्र गुणो द्वित्वम्। गुणनाशादिति। द्वित्व(४)नाशादित्यर्थः। द्रव्यज्ञानमिति(५)। द्वे द्रव्ये इति द्रव्यज्ञानानुत्पत्तिरित्यर्थः। तत इति। संस्कारादित्यर्थः। तस्या इति। द्वित्वत्वसामान्यधीकाले अपेक्षाबुद्धिनाशादित्यर्थः। विशेष्यज्ञानमिति। एकत्वगुणविशिष्टद्रव्यज्ञानमित्यर्थः। विशिष्टस्यैवेति। एकत्वगुणविशिष्टद्रव्य(६)स्यैवेत्यर्थः। विशिष्टज्ञानेति। द्वे द्रव्ये इति विशिष्टज्ञानानुत्पत्तिप्रसङ्ग(७)

(१) धियः—इति नास्ति (क) (ख) पु०।
(२) न वा इति नास्ति (क) (ख) पु०।
(३) इत्यनेन—इति (क) (ख) पु०।
(४) गुण—इत्यधिकम् (ख) पु०।
(५) प्रत्यभिज्ञानेति—इति (ख) पु०।
(६) गुण—इत्यधिकम् (ख) पु०।
(७) प्रसङ्ग इति नास्ति (क) (ख) पु०।



श्चेत्यर्थः। द्वित्वोत्पत्तिरिति(१)।(२)

यद्यप्ये(३)कत्वगुणविशिष्टद्रव्यज्ञानस्या(४)पेक्षाबुद्धित्वे नैतद्दोषावकाशः(५)। (६)तथाप्येकत्वगुणज्ञानम् अपेक्षाबुद्धिं विपक्षित्वा एतदुक्तम्। (६) न च तस्या अपि(७) संस्कारजनकत्वम्। विशिष्टज्ञानमात्रस्य संस्काराजनकत्वात्(८)।

द्वे द्रव्ये इति ज्ञानान्यथानुपपत्त्या द्वित्वत्वसामान्यधीसामग्र्या एवापेक्षाबुद्धिनाशे प्रतिबन्धकत्वकल्पनाद्वित्याहुः।(९) प्रत्यक्षपरतया व्याचष्टे-यदेतदिति। तत्रान्यथासिद्धिं निराकरोति-न चेति। न चानेकदेशव्यापकसंयोगवदवयविविषयत्वेनार्थान्तरम्। अवयवसंयोगाग्रहेऽपि त्वचापरिमित मित्यनुभवात्। अत्र(१०)त्र्यणुकं चाक्षुषधीनिमित्तगुणाभाववत् सालोके(११)न्द्रि-

(१) द्वित्वादीति—इति (क) पु०।
(२) एतत्तु एकत्वगुणज्ञानमपेक्षाबुद्धिरित्यभ्युपेत्य परिहृतम्। इत्यधिकम् (क) पु०।
(३) यद्यपि—इति नास्ति (क) पु०।
(४) एव—इत्यधिकम—(क) पु०।
(५) दोषावसरः—इति (क) पु०।
(६)-(६) नास्ति (क) पु०।
(७) अस्यापि इति (ख) पु०।
(८) तथात्वेऽपि वा—इत्याधिकम् (क) पु०।
(९) प्रतिबन्धककल्पनाद्वेत्यर्थः—इति (क) पु०।
(१०) तत्र—इति (क) पु०
(११) आलोक—इति (ख) पु०।

यसंनिकृष्टत्वे सति अचाक्षुषद्रव्यत्वात् पवनवदित्यनुमानं प्रयोजकम् । अनेकद्रव्यवत्त्वाभावेनाचाक्षुषत्वोपपत्तेः । ननु परिमितमित्यनुगतव्यवहारात् परिमाणं जातिः स्यादित्यत आह—**न चैतदिति** । अतिशयस्य क्रियागुणमात्रवृत्तितया जातावसत्त्वादित्यर्थः । (१)परिमाणस्य जातित्वे(१) द्रव्यत्वेन सहान्यूनानतिरिक्तव्यक्तिवृत्तित्वं महत्त्वस्यापि जाति[२]त्वे पृथिवीत्वादिना परापरभावानुपपत्तेश्चेति(३) द्रष्टव्यम् ।

व्यवहारशब्दस्य शब्दपरत्वे विपक्षे बाधकमाह-**यदि चेति । घटशब्दादिति** ।

ननु घटशब्दात्परिमाणसंशयो न भवत्येव । घटस्य द्रव्यत्वेन परिमाणवत्त्वनियमात् । परिमाणविशेषसंशयश्च(४) घटविशेषसंशयवदिष्यत एवेति(५) ।

मैवम् । व्याप्तिबलेन घटशब्दात् घटनिश्चयोत्तरं द्रव्यत्वेन परिमाणवत्त्व(६)निश्चयात् । घटपरिमाणयोरभेदे घटशब्दादेव तन्निश्चयापत्तेः(७) । न(८) च घटपदात् परिमाणनिश्चयो भ-

(१)-(१) नास्ति (क) पु० । परिमाणस्य जातित्वेन यावद्द्रव्यवृत्तित्वे—इति (ख) पु० ।

(२) रूप-इत्यधिकम् (ख) पु० । (३) इत्यपि—इति (ख) पु० ।

(४) च—इति नास्ति (ख०) पु० ।

(५) इति—इति नास्ति (ख) पु० ।

(६) वत्त्व—इति नास्ति (क) (ख) पु० ।

(७) उपपत्तिः—इति (ख) पु० ।

(८) (क) पुस्तके नास्ति ।



वत्येवेति वाच्यम् । तयोरभेदे परिमाणपदादपि घटनिश्चयापत्तेः । घटस्य परिमाणमिति भेदानुभवाच्च ।

ननु हस्तवितस्त्यादिव्यवहारः प्रत्येकसमुदायविकल्पान्न युक्त इत्यत आह—**मानव्यवहारेति** । अनेन परिमाणत्वं जातिः सामान्यलक्षणमुक्तम् । न च महत्त्वेनैव परिमाणव्यवहारोपपत्तेर्जात्यभावः । महत्त्वं साक्षात्कारविरोधिजातिसमानाधिकरणगुणत्वसाक्षाद्व्याप्यजातिमत् साक्षात्कारप्रयोजकमूर्तगुणत्वात् रूपवदित्यणुत्वपरिमाणत्वजातिसिद्धेः । न च रूपत्वमत्रोपाधिः । तुल्ययोगक्षेमत्वात् । न च परिमाणत्वस्य लक्षणत्वे रूपादीनामपरसामान्यसम्बन्धात् रूपादिसंज्ञा भवन्तीत्यनेन पौनरुक्त्यम् । प्रकारान्तरेण परिमाणत्वस्याभिधानात् । ननु प्रकारचतुष्टयं प्रतिज्ञाय प्रकारिणां तदभिधानं विरुद्धमित्यत आह—**भावेति** । सुप्रसिद्धत्वात् प्रत्यक्षत्वादित्यर्थः । ननु नित्यमहत्त्वमेव परममहत्त्वमिति पौनरुक्त्यमित्यत आह—**तदेवेति । काष्ठाप्राप्तत्वादिति** । सजातीयप्रतियोगिकापकर्षानाश्रयत्वं परमत्वम् । अत एवाणुत्वेऽपि परमत्वमित्यर्थः । अणुत्वे द्विविधे आकरे नाभिहिते इत्यत आह—**अपिनेति** । [१]**तृणोलपेति** । उलपो बाणतृणम् । पौनरुक्त्यनिराकरणार्थमाह—**उच्यत इति**[२] । प्रकर्षभावाभावावेकत्र विरुद्धाविति तयोराश्रयभेदमाह—**आमलक इति । उभाभ्यामिति** । गौणमुख्य-

(१) नास्ति (क) पु० ।

(२) इतीति—इति (क) पु० ।

व्यवहारविषयाभ्यां भज्यते सम्बध्यत इत्यर्थः । उभयत्रापि तस्य वृत्तेः । द्रव्यत्वेनेति ।

ननु महत्त्वमत्रोपाधिः । अथ महत्त्वं यदि परिमाणत्वं तदा-साधनव्यापकत्वम् । अथ परिमाणविशेषस्तदा साध्याव्यापकत्वं तेन विनापि परिमाणसामान्यसत्त्वात् । तन्न । महत्त्वविरुद्धाणुत्वासिद्धौ महत्त्वमेव परिमाणं प्रत्यक्षताप्रयोजकमिति तस्य साधनव्यापकत्वे परमाणौ महत्त्वापत्तेः । महत्त्वभिन्नदीर्घत्वपरिमाणसिद्धावप्यणुत्वासिद्धेः(१) । नापि द्व्यणुकोपादानम् । महत्त्ववृत्तिगुणत्वव्याप्यजातिमत् गुणवत् द्रव्यत्वात् । न च महत्त्वमेव तथा परमाणोरपि प्रत्यक्षतापत्तेरिति (२)महत्त्वाणुत्वसाधारणपरिमाणत्वजातिः सिध्यतीति(२) मानम् । महत्त्वस्योपाधित्वात् ।

नैवम् । द्रव्यत्वस्य सर्वपरिमितवृत्त्यपरिमितावृत्तिजातित्वानुपपत्तेर्विपक्षे बाधकाद्धेतोः साध्यव्याप्यतयोपाधेस्तदव्यापकतया साध्याव्यापकत्वात् ।

यद्वा । महत्परिमाणं महापरिमाणासमानाधिकरणगुणवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत् मूर्तगुणत्वात् रूपवदिति(३) परिमाणत्वजातिसिद्धिः । द्व्यणुकपरिमाणं परिमाणत्वव्याप्यजातिमत् परिमाणत्वात् महत्त्ववदि(४)त्यणुत्वजातिसिद्धिः(४) । न चा-

(१) वा—इत्यधिकम् (क) (ख) पु० ।

(२)-(२) नास्ति (क) (ख) पु० ।

(३) (क) पुस्तके नास्ति । (४)-(४) (क) पुस्तके नास्ति ।



भावस्येति । अपकर्षस्य जातिरूपत्वेनाभावावृत्तेरित्यर्थः । न चापकर्षोऽसिद्धः(१) । अणुत्ववृत्तिसामान्यं सजातीयोत्कृष्टापकृष्टवृत्ति परिमाणत्वव्याप्यजातित्वात् महत्त्ववत् । न च महत्त्वाभावेनान्यथासिद्धिः । तावन्मात्रस्य द्व्यणुकपरिमाणसाधारणतया अणुतरव्यवहारानापत्तेः ।

कारणाभावादिति । अवयववृत्तिबहुत्वमहत्त्वप्रकर्षा(२]भावादित्यर्थः । ननु अन्यत्र भाक्तव्यवहारे गौण[३]मुख्यवृत्तित्वं धर्मविशेषस्य ज्ञातम् अत्र तु महत्त्वप्रकर्षाभावस्य न परमाण्वादिवृत्तित्वं प्रतीयते तत्कुतो भाक्तत्वमतो महत्त्वप्रकर्षाभाव एवाणुपदवाच्योऽस्त्वित्यत आह—एतेनेति । प्रत्यक्षासिद्धत्वादिति। आमलकादाविति शेषः । परमाणौ च महत्त्वानाधारे महत्त्वप्रकर्षाभावोऽनुमेय इति भावः । तथापि महत्त्वप्रकर्षाभावस्याणुपदवाच्यत्वे किं बाधकमित्यत्राह—अन्यायश्चेति । अणुत्वपरिमाणे शक्तावन्यत्र वृत्त्यन्तरेणापि प्रयोगोपपत्तौ नोभयत्रापि शक्तिकल्पनमित्यर्थः । तथाप्यनुपपत्तिं विना तुल्यवदुभयत्रापि[४] प्रयोगात् कथं भाक्तनिर्णयो[५] न चैकत्र शक्तिग्राहकमस्ति[६] ।

(१) अपकर्षासिद्धिः—इति (ख) पु० ।

(२) प्रचया—इति (क) (ख) पु० ।

(३) गौण—इति नास्ति (क) पु० । गुण—इति (ख) पु० ।

(४) अपि—इति नास्ति (क) (ख) पु० ।

(५) भाक्तत्वमुख्यत्वनिर्णयो—इति (क) (ख) पु० ।

(६) विनिगमकम्—इति (ख) पु० ।

अत्राहुः। अणुत्वजातेरखण्डतया सैवाणुपदवाच्या। प्रकर्षाभावस्य तु प्रतियोगिनिरूप्यतया(१) सखण्डत्वेन गुरुत्वात्। स्वर्गादिपदवदिति। यथा स्वर्गपदस्य यद्यपि यन्न दुःखेनेत्याद्यर्थ(२)वादोपस्थिते सुखपदा(३)र्थे ऐहिकसातिशये सुखे(४) चन्दनादौ च तुल्यवत्प्रयोगस्तथापि दुःखासंभिन्नत्वाद्युपलक्षितसुखस(५)जातीये स्वर्गपदस्य शक्तिरैहिकसुखे च सातिशयत्वोपाधिना शक्यैकदेशे स्वर्गपदप्रयोगः। चन्दनादौ च तादृशसुखसाधनतोपाधिकः। उभयत्र शक्तौ नानार्थतया गौरवादित्यर्थः। तथा दीर्घत्वमपीति। दीर्घत्वं सजातीयावधित्वानाश्रयव्यक्तिवृत्ति परिमाणत्वव्याप्यजातिमत्त्वा(६)त् महत्त्ववत्। एवं ह्रस्वत्वमपि पक्षीकृत्यानुमेयम्। दीर्घत्वोपपत्ताविति। यथा दीर्घत्वे सत्यपि ह्रस्वत्वसत्त्वे विरोधाभावस्तथा परमाणुपरममहद्द्रव्ययोरन्यतरपरिहारेणैव दीर्घत्वह्रस्वत्वयोः स्थितेर्न तयोः समावेशः। स हीति।(७)दीर्घत्वप्रकर्षभावापेक्षो ह्रस्वत्वव्यवहार(७) इत्यर्थः।

(१) निरूप्यत्वात्—इति (ख) पु०।
(२) आदि—इति नास्ति (ख) पु०।
(३) सुख—इति (क) (ख) पु०।
(४) ऐहिकातिशयसुखे—इति (क) पु०।
(५) स—इति नास्ति (क) (ख) पु०।
(६) जातित्वात् इति (क) (ख) पु.
(७)-(७) दीर्घापेक्षो ह्रस्वत्वव्यवहार—इति (क) पु०।



अस्मदादीनामिति। द्व्यणुकेष्वानुमानिकापेक्षाबुद्धिसंभवेऽप्यस्मदादीनां सर्गादौ तदभावादित्यर्थः। नन्वीशापेक्षाबुद्धेर्द्व्यणुकैकत्ववत् (१) द्रव्यान्तरैकत्वानामपि विषयत्वात् कथं नियमेन संख्याविशेषोत्पत्तिरित्यत आह—ईश्वरबुद्धेरिति। तत्तदेकत्वविषयतावच्छेदेन तस्या अपेक्षाबुद्धित्वादित्यर्थः(२)। संयोगोत्पत्तीति। त्र्यणुकारम्भकसंयोगोत्पत्तिसमानकालीन(३)त्वादित्यर्थः। संख्योत्पत्तेर्महत्त्वजनकत्रित्वसंख्योत्पत्तेरित्यर्थः। कार्यभेदो महत्त्वदीर्घत्वरूपः। अत्रेति। बहुत्वस्य महत्त्वारम्भकत्व इत्यर्थः। व्यभिचारं स्पष्टयति—रूपस्येति। प्रकर्षाप्रकर्षाननुविधानं विवृणोति—स्पर्शस्येति। परत्वापरत्वे चेति। परत्वापरत्वयोर्दिगादिपिण्डसंयोगासमवायिकारणकत्वात् तस्य च परिमाणोत्तरकालभावित्वादित्यर्थः।

नन्ववयवपरत्वापरत्वाभ्यामवयविनि परिमाणं जन्यताम्। न चासमवायिकारणोत्कर्षेण कार्योत्कर्षाद्यत्रानेकपुरुषापेक्षाबुद्धिभिरनेकानि परत्वान्युत्पादितानि तत्र कार्ये परिमाणोत्कर्षः स्यात्(४)। तत्रापि यत्रानेकपुरुषापेक्षाबुद्धिजन्यान्यनेकानि त्रित्वानि सन्ति(५) तत्र परिमाणोत्कर्षापत्तेः। व्यक्तिबाहुल्य-

(१) अणुकजनकैकत्ववत्—इति (ख) पु०।
(२) बुद्धित्वमित्यर्थः—इति (क) (ख) पु०।
(३) काल—इति (क) (ख) पु०।
(४) स्यात्—इति नास्ति (क) पु०।
(५) सन्ति—इति नास्ति (क) (ख) पु०।

लक्षणसमवायिकारणोत्कर्षः कार्योत्कर्षप्र(१)योजक इति तुल्यम्।

मैवम्। परिमाणस्य स्वाश्रयोत्पत्त्यव्यवहितोत्तरक्षणोत्पत्तिकत्वात् परत्वादेश्चापेक्षाधीविलम्बात्तदनन्तरभावित्वात्। पृथक्त्वं चावधिज्ञानोपस्थाप्यतया संख्यापेक्षया विलम्बो(२)पस्थितिकमिति न परिमाणजनकम्। **तथा वेग इति**(३)। परिमाणोत्तरकालमुत्पद्यत इत्यनुषज्यते। कर्मजन्य इति शेषः। वेगासमवायिकारणस्य वेगस्य वा सार्वत्रिकत्वादिति भावः। **बुद्ध्यादीनामिति**। आत्मवृत्तिबुद्ध्यादीनां घटादिनाऽप्रत्यासत्तेरित्यर्थः। **त्रितयमिति**। संख्या परिमाणं प्रचयश्चेत्यर्थः। **तत्र द्व्यणुक इति**। स्वाभिमुखभूयोऽवयवासंयोगित्वे सति तत्संयोगात्मकः प्रचयो न द्व्यणुक इत्यर्थः। द्विबहुभिरित्यत्र मिलितस्याकारण(४)त्वादन्यथा व्याचष्टे—**द्वौ (५)बहवश्चेति**। द्वाभ्यामारब्धेऽर्थे(६) कारणमहत्त्वबहुत्वाभावादेकशेषमाह—**कारणमहत्त्वे चेति**। **गुणकर्मेति**। स्वाजनकभावभूतकारणापेक्ष्य इत्यर्थः। सामग्रीतः सर्वसंभवात् द्रव्यारम्भेऽपि संयोगस्यापेक्षणात्(७)। **अभेद इति**।

(१) र्षाप्र—इति (ख) पु०।
(२) विलम्बितो—इति (क) (ख) पु०।
(३) वेगोऽपि—इति (क) (ख) पु०।
(४) अकरण—इति (ख) पु०।
(५) द्वौ च—इति (ख) पु०।
(६) अर्थे—इति नास्ति (क) (ख) पु०।
(७) संयोगस्य सापेक्षत्वात—इति (क) (ख) पु०।



ननु निर्धारणं महत्त्वविशेषविषयकमवयव(१)संस्थानविशेषविषयं वा स्यात्। अन्यथा महत्सु चतुरस्रं वर्तुलं मण्डलं (२)चानयेति व्यवहारात् परिमाणान्तरमपि स्यात्।

अत्राहुः। महत्त्वदीर्घत्वयोरभेदे इदमस्मान्न महत् किन्तु दीर्घमिति प्रतीतेर्महत्तरेषु दीर्घतरमानीयतामिति प्रतीतेश्चानुपपत्त्या महत्त्वातिरिक्तं परिमाणान्तरमेव दीर्घत्वम्। वर्तुलत्वादीनां(३) च महत्त्वविशेषत्वेन परिमाणान्तरत्वे गौरवम्। **आरोहपरिणाहौ चेति**। न च संस्थानवृत्तिजातिविशेषावेव तौ। अन्यतरकर्मजत्वादिना परापरभावानुपपत्तेः। गुणवृत्तिजातौ तददोषत्वस्य निर्बीजत्वात्। **सुविहितमिति** सोपहासम्। **योगिनामिति**। योगिनो ह्रस्वत्वाणुत्वयोर्भेदं जानन्तीत्यत्र मानमाहुः। अणुपरिमाणं समानाधिकरणपरिमाणभिन्नं परिमाणत्वात् महत्त्ववत्। **अस्माकं त्विति**।

ननु ह्रस्वत्वस्य परिमाणान्तरस्यासिद्धावणु(४)व्यवहारः परं भक्तिः। (५)ह्रस्वव्यवहारश्च दीर्घाभावनिबन्धनो मुख्य एवेति भाक्तत्वे तस्य मानाभावः(५)। न च भाक्तत्वे त(६)

(१) अवयव—इति नास्ति (क) पु०।
(२) परिमण्डलं—इति (क) पु०।
(३) वर्तुलादीनां—इति (ख) पु०।
(४) अणुत्व—इति (ख) पु०।
(५)-(५) ह्रस्वत्वव्यवहारोऽपि दीर्घत्वाभावनिबन्धनो मुख्य एव। न तद्भाक्तत्वे मानम्—इति (क) पु०।
(६) तत्— नास्ति (ख) पु०।

त्पौनरुक्त्यम् । महत्त्वाणुत्वह्रस्वत्वव्यवहारयोर्महत्त्वदीर्घत्वप्रकर्षाभावनिबन्धनत्वात् ।

अत्राहुः(१) । नुक्तानुमानेन(२)ह्रस्वत्वासिद्धौ लाघवाच्चत्र ह्रस्वपदशक्तिग्रहे दीर्घत्वाभावे तद्व्यवहारो(३) भाक्तोऽन्यथा मुख्यत्वाभावे भाक्त एव न स्यात् । **विनाश इति** । एकस्मिन्नेव द्रव्ये पूर्वपरिमाणनाशे परिमाणान्तरोत्पत्तौ च कारणाभावादित्यर्थः । ननु शरीरारम्भकातिरिक्तद्रव्ये संख्यादयः परिमाणकारणानि स्युरित्यत आह—**कारणेति** । समवायिकारणवृत्तिसंख्यादीनामेवेत्यर्थः । नन्ववस्थितपूर्वद्रव्यावयवसहिततत्संयुक्तद्रव्याभ्यां द्रव्यान्तरोत्पत्तिसहकारित्वशात् पूर्वपरिमाणनाशपरिमाणान्तरोत्पत्ती स्यातामित्यत आह—**तत्संयोगिद्रव्यैरिति** । **सति पूर्वद्रव्य इति** । पूर्वद्रव्यनाशे चाश्रयनाशादेव परिमाणं नश्येत् । आरम्भेऽपि(४) द्रव्यान्तरे परिमाणान्तरोत्पत्ति(५)र्न तु पूर्वद्रव्य इति भावः । तैः संख्यादिभिरित्यर्थः । **असमवायीति** । समवायिकारणप्रत्यासन्नस्यैवासमवायिकारणत्वात् । अनारम्भकद्रव्यान्तरसंख्यादीनामतथात्वादित्यर्थः । **ज्ञानमिति** । अपोद्धारपदेन भावव्युत्पत्त्या ज्ञानमुच्यते

(१) मैवम्—इति (क) पु० ।

(२) नास्ति (क) पु० ।

(३) अन्यत्र दीर्घत्वाभावेनेतरव्यवहारो—इति (क) पु० ।

(४) अपि—इति नास्ति (ख) पु० ।

(५) परिमाणोत्पत्ति—इति (ख) पु० ।



करणव्युत्पत्त्या च ज्ञानकारणं(१) (२)शब्द नुच्यत(२) इत्यर्थः । अस्यैव व्यवहारत्वादभेदे षष्ठ्यर्थानुपपत्तेः षष्ठीसमासानुपपत्तेराह —**स चासाविति** ।

**प्रमाणलक्षणे इति** । एतस्मादिदं पृथगिति प्रत्यक्षं त्रयोविंशतिगुणाविषयकं मानं जातिविशेषश्च लक्षणमित्यर्थः । **तर्कस्त्विति** । यदि पृथक्त्वं घटादिभिन्नं न स्यात्पृथगानयेत्युक्ते घटं पटं वेति संशयो न स्यादिति तर्कः प्रत्यक्षानुग्राहकः पृथक्त्वस्य गुणत्वे नास्तीत्यर्थः । **इतरेतराभावेनैवेति** (३) । घटातिरिक्तान्योन्याभावेनोक्ततर्कस्योपपत्तेर्गुणाग्राहकत्वादित्यर्थः । प्रत्यक्षमन्योन्याभावविषयत्वेनान्यथासिद्धे न मानम् । न च तथा सति विधिमुखः प्रत्ययो न स्यात् । न हि नञोऽप्रयोग इत्येव विधिः किं त्वन्योन्याभावविशिष्टे पृथक्शब्दस्य शक्तिरिति शक्यार्थे पदप्रयोगत एव गुणादावपि पृथक्शब्दप्रयोग इति भावः । सिद्धान्तमाह—**पृथगादिशब्दा इति** । पर्यायत्वमर्थैक्यात्स चैकार्थः पृथक्त्वगुण एवेत्यर्थः । संबन्धानुपपत्तिमेवाह—**न हीति** । **प्रातिपदिकार्थमात्र एवेति** । तथा च(४) घटात्पटः पृथगित्यत्र(५) घटः पटो न भवतीत्यर्थ इति न पञ्चमीसम्बन्धानुप-

(१) करणम्—इति (ख) पु० ।

(२) नास्ति (क) पु० ।

(३) ०भावेनैव तर्कस्य—इति (क) पु० । भावेनैवोक्ततर्कस्य—इति (ख) पु० ।

(४) तथा च—इति नास्ति (ख) पु० ।

(५) इत्यस्य—इति (ख) पु० ।

पत्तिरित्यर्थः । अन्यारादिति । अन्यपर्याययोगे पञ्चम्यनुशासनात् घटात्पटोऽन्य इत्यत्रेव घटः पटो नेत्यत्रापि पञ्चमी स्यादित्यर्थः ।

नन्वन्यशब्दार्थ एव क्वचित्प्रतियोगिना निरूप्यते क्वचिदवधिना । यत्रावधिना स निरूप्यते तत्र पञ्चमी शब्दशक्तिवैचित्र्यात् यथा ग्रामादागत इत्यत्रागमनम् अवधिना निरूप्यमिति पञ्चमी । ग्रामस्यागमनभागयमित्यत्र तदेव सम्बन्धिनिरूप्यमिति न तत्र पञ्चमी । मैवम् । शब्दशक्तिवैचित्र्यासिद्धेः । दृष्टान्ते नावधौ पञ्चमी किन्त्वपादाने । यदाऽपादानमेव सम्बन्धत्वेन विवक्ष्यते तदा षष्ठीत्यविरोधात् । न च तत्पदप्रयोगेऽनभिधानात्पञ्चम्यभावः । अन्योन्याभावपदप्रयोगेऽपि पञ्चम्यभावात् । न च सोऽप्यनभिधानप्रयोजकः । इतरेतराभाववान् घट(१) इत्यत्रापि पञ्चम्यप्रयोगात् । न च तत्राप्यनभिधानमेव । तथा सति तत्तत्पदानामनभिधानप्रयोजकत्वे गौरवाद्व्यभिचाराच्च । नञर्थवाचकपदप्रयोग एव प्रयोजको लाघवात् अनुगतत्वाच्चेति । तथा च(२) तदर्थवाचकत्वे (३)पृथगादिशब्दानां तत्तत्पदप्रयोगेऽपि पञ्चम्यभावापत्तेः (३) । नञर्थेति । अन्योन्याभाववद्वाचकपदप्रयोगे पञ्चम्यनुशासनात् । अन्योन्याभाववाचकपदप्रयोगे न पञ्चमीत्याशयः(१) । (२)अपटो घट इति(२) । अपट इति समासेनान्योन्याभाववतोऽभिधानात्पञ्चमी स्यादित्यर्थः । (३)वस्तुतस्तु घटःपटो न भवतीत्यत्रापि समानाधिकरणप्रतीतेर्नञ्शब्दस्याभाववद्वाचकत्वाच्च नञर्थवैशिष्ट्यसत्त्वेन पञ्चमी स्यादित्यर्थः ।

( १ ) इतरेतराभावाभाववान् पट—इति (क) पु० ।

( २ ) तथा सति—इति (ख) पु० ।

( ३ ) पृथगादिशब्दानां प्रयोगे पञ्चमी न स्यात्—इति (क) पु० । तत्पद—इति नास्ति (ख) पु० ।



एतेन भेद एव पृथक्त्वमित्यपास्तम् । घटः पटो नेत्यत्र पञ्चमीप्रसङ्गात् । किञ्चेदमस्मात्पृथगिति धीविषयोऽवधिना निरूप्यः पृथक्त्वम् । न चान्योन्याभाव एव । इदमिदं न भवतीति प्रतीत्यापत्तेः । न च पञ्चम्यन्तपदाभिलप्यमानं प्रतियोगित्वमेवावधित्वम् ।

पञ्चमीप्रयोगस्यावधिज्ञानोत्तरकालीनत्वात् । पञ्चम्यज्ञानेऽपि पृथक्त्वप्रतीतेः(४) । अन्यथा घटात्पटो नेत्यपि प्रतीतिः स्यात् । नन्ववधित्वं न पृथक्त्वनिरूपकत्वम् अन्योन्याश्रयात् । नापि वस्तुगत्या योऽवधिस्तन्निरूप्यं पृथक्त्वम् । पृथक्त्वनिरूपणात्मक् तत्रावधित्वाभावात् ।

अत एव पृथक्त्वात्यन्ताभाववत्त्वमवधित्वमित्यपास्तम् । अवधौ ज्ञाते पृथक्त्वज्ञानं तज्ज्ञाने तदत्यन्ताभाववत्त्वज्ञान(५)मित्यन्योन्याश्रयात् ।

( १ ) न पञ्चमीत्यर्थः—इति (क) (ख) पु० ।

(२)-( २ ) नास्ति (ख) पु० ।

( ३ ) एतत्पदप्रयोगेऽपि पञ्चम्यभावापत्तेः । इत्यधिकम्—(क) पु० ।

( ४ ) च—इत्यधिकं (क) (ख) पु० ।

( ५ ) ज्ञानम्—इति नास्ति (क) (ख) पु० ।

अत्राहुः । पृथक्त्वनिरूपकत्वज्ञानं न पृथक्त्वज्ञानकारणम् अपि तु यत्रैतद्वर्त्तते तज्ज्ञानम् अन्यथा प्रतियोगिज्ञानेऽप्यन्योन्याश्रयापत्तेः ।

यद्वा । पृथक्त्वसामान्यज्ञानपूर्वकं पृथक्त्वविशेषज्ञानमिति नान्योन्याश्रयः ।

ननु घटात्पटः पृथगित्यत्र पञ्चमी निषेधवाचिका तत्रैवोपपदविभक्त्यनुशासनात् । तथा चापटो घट इत्यत्र नञैव निषेधस्योक्तत्वात् किमभिधातुं पञ्चमी स्यादित्याशङ्क्य निराकरोति—**न चेति** । तथा सति घटात्पट इत्यस्यैव न घटः पट इत्यर्थे पृथक्पदप्रयोगे पौनरुक्त्यं स्यादित्यर्थः । ननु घटात्पटः पृथगित्यत्र विशिष्टो व्यावृत्तविशेषणसम्बन्धात्मकः पृथक्शब्दार्थ इत्याह—**पृथक्शब्दस्येति** । यदि विशिष्टं पृथक् तदा पूर्वं यच्छब्दविशिष्टं व्योम तदेव पश्चात्तच्छब्दविशिष्टं तत एव पृथक् स्यादित्येवं बुद्ध्याद्यविशिष्टादात्मादेस्तद्बुद्ध्यादिविशिष्टः स एव ततः पृथक् स्यादित्याह—**शब्देति** । वैधर्म्यं यदि तन्निष्ठात्यन्ताभावप्रतियोगिधर्मवत्त्वं तदा तन्नावधिनिरूप्यमित्यसमानकालीन(१)धर्मवत्त्वं वाच्यं तत्राह—**श्यामाद्रक्त इति** । वैधर्म्यस्य सातिशयत्वात् पृथक्त्वस्य च निरतिशयत्वादित्यपि द्रष्टव्यम् । **जातिसंकरेति** । घटावधिकपृथक्त्वस्य घटावृत्तित्वात् पटावधिकपृथक्त्वस्य पटावृत्तित्वात् तदुभयं मिथोऽत्यन्ताभाव-

(१) कालीन—इति नास्ति (क) (ख) पु० ।



समानाधिकरणमन्यत्र लोष्टादौ संकीर्येतेत्यर्थः । न च पृथक्त्वं सामान्यमेकमेव(१) । द्रव्यत्वेन सत्तया सहान्यूनानतिरिक्तव्यक्तिवृत्तित्वापत्तेः । **व्यभिचाराच्चेति** । द्रव्यमात्रे रूपादीनामवृत्तेरित्यर्थः । **एवं चेति** । परिशेषात् गुणत्वे सतीत्यर्थः । **भेदश्चेति** । भेदात्मकसादृश्यात् अद्रव्येषु पृथक्त्वारोपात् पृथक्त्वव्यवहार इत्यर्थः । **सामान्यलक्षणापत्तेरिति** । अनित्यद्रव्यवृत्ति(२)पृथक्त्वस्य नित्यद्रव्यवृत्तिनित्यपृथक्त्वेनैक्यात् नित्यतया सामान्यलक्षणयोगात्पृथक्त्वं सामान्यं स्यादित्यर्थः । लोष्टात् घटपटौ द्वौ पृथगित्यनुभवात् द्विपृथक्त्वं(३)गुणान्तरमाक्षिपति—**तथापीति** । द्वौ पृथगित्यनुभवस्य द्वित्वसमानाधिकरणैकपृथक्त्वाभ्यामेवो(४)पपत्तेः । अन्यथा द्वौ शुक्लावित्यनुभवात् द्विशुक्लत्वमपि गुणान्तरं स्यादित्यर्थः । **अन्योन्येति** । यदि द्वित्वसमानाधिकरणाभ्यां पृथक्त्वाभ्यां द्वौ पृथगिति धीर्जननीया तदा चैत्रमैत्रौ चैत्रात् पृथक् मैत्राच्चेति प्रतीतिः स्यादिति । एकपृथक्त्वस्य द्वित्वेनान्यूनानतिरिक्तव्यक्तिवृत्तित्वाभावात् । यावति द्वित्वं समाप्यते तावति गुणान्तरं वाच्यमित्यर्थः । ननु पृथक्त्वाश्रयतावच्छेदकत्वेनैव द्वित्वं प्रतीयते द्वित्वाश्रयतया च चैत्रमैत्रयोः प्रतीता कथं तस्यावधित्वं प्रतीयतां पृथक्त्वाश्रयतावच्छेद-

(१) एव—इति नास्ति (क) (ख) पु० ।
(२) वृत्ति—इति नास्ति (क)(ख) पु० ।
(३) न—इत्यधिकम् (ख) पु० ।
(४) पृथक्त्वादेवो—इति (ख) पु० ।

करूपाविरहेणोपलभ्यमानस्यैवावधित्वात् ।

मैवम् । आश्रयमात्रवृत्तेरेव धर्मस्याश्रयतावच्छेदकत्वात् । द्वित्वस्यैकपृथक्त्वाश्रयमात्रवृत्तित्वाभावात् । द्वित्वं च व्यासज्यवृत्तीत्युपसंहारव्याजेनाह— **तस्मादिति** ।

**प्रत्येकमिति** । प्रत्येकं द्वाविति व्यवहारप्रसङ्गादित्यर्थः । **एवं तर्हीति** । चैत्रो मैत्रात्परो मैत्रश्चैत्रादपर इति प्रतीतेरन्योन्यावधिके परत्वापरत्वे प्रतीयेते न तु चैत्रमैत्रौ चैत्रान्मैत्राद्वा पराविति ततो द्विपरत्वमपि गुणान्तरं स्यादित्यर्थः । **नहीति** । समानदेशस्थितयोः(१) परस्परावधिकपरत्वापरत्वाभावेनैव तथा व्यवहाराभावोपपत्ते(२)र्द्वित्वसमानाश्रयपरत्वेनैव द्विपरत्वप्रतीतिरन्यथासिद्धेत्यर्थः । प्रतीतिविषये भवतः किं समानादेशस्थितौ चैत्रमैत्रौ पराविरयनुभवान्न द्विपरत्वसिद्धिः । तथाहि(३) । मैत्रो यदि देवदत्तावधिकचैत्रनिष्ठपरत्वाधारः स्यात् तदा देवदत्तचैत्रोभयनिरूपितयावन्मध्यत्वनिरूपकः स्यादिति प्रतिकूलतर्कात्तथैव व्याप्तेरिति(४)मन्तव्यम् । **यत्रास्तीति** । असमानदेशस्थयोरित्यर्थः । **यत्रापीति** । द्विपरत्वेऽप्यसमवायिका

(१) समानदेशस्थयोः—इति (क) पु० । समानदेशयोः—इति (ख) पु० ।

(२) व्यवहारोपपत्तेः—इति (क) पु० ।

(३) तथाहि—इति नास्ति (क) पु० ।

(४) ०तर्कइतिश्चेति—इति (क) (ख) पु० ।



रणत्वं प्रत्येकवृत्तिपरत्वापरत्वयो(१)र्वाच्यमिति तयोरुत्पत्तिरावश्यकी न तु अत एव तत्रापि व्यवहार(१)इत्यर्थः । **तदनादृत्येति** । अतिशयमनपेक्ष्येत्यर्थः । **यद्येवमिति(२)** । द्वित्वादिसामान्यं संख्यायां पृथक्त्वसामान्यमेकपृथक्त्वमेकपृथक्त्वे मिथोऽत्यन्ताभाववति वर्तमानमेकत्र द्विपृक्त्वादौ सङ्कीर्येतेत्यर्थः ।

**कारणविशेषादिति** । एकपृथक्त्वं कारणपृथक्त्वाज्जायते । अवयविनि द्विपृथक्त्वं त्वपेक्षाबुद्धेर्जायते । अतः कारणभेदव्यङ्ग्यम् । मिथो वैजात्यमस्त्येवेत्यर्थः । संख्यात्वमेकानेकवृत्तिवृत्तिगुणत्वसाक्षाद्व्याप्यजातिसमानाधिकरणात्यन्ताभावप्रतियोगि गुणत्वसाक्षाद्व्याप्यजातित्वात् रूपत्ववदित्येकपृथक्त्वद्विपृथक्त्वसाधकमनुमानमप्याहुः ।

**यद्विशिष्ट इति** । विशिष्टज्ञानस्य विशेषणधीजन्यतया सैव संयोगे मानमित्यर्थः । **एतेनेति** । रूपादित्रयोर्विशसजन्यद्रव्यगुणकर्माणि यदि गुणासमवायिकारणककार्याणि न स्युः कर्माजन्यकार्याणि न भवेयुरित्यापादनार्थोऽतो न वैयधिकरण्यं प्रतियोग्यप्रसिद्धिर्वा । ननु द्रव्यादिभ्यः कार्यविशेषकुर्वद्रूपीभूयोत्पन्नेभ्यः परिणामविशेषसहितेभ्यो वा तत्र कार्याणि भवेयुः(३) किं संयोगेनेत्यत आह—**क्षणभङ्गेति** । **सहकारितयेति** ।

(१)-(१) वाच्यम् । तथाच तत्र तयोरवश्यमुत्पत्तिर्वाच्येति तन्निबन्धन एव तत्रापि तद्व्यवहार—इति (क) पु० ।

(२) जातिसङ्कर इति—(क) पु० ।

(३) स्युः—इति (क) पु० ।

यद्यपि पूर्वसंयोगात्मकप्रतिबन्धकाभावं समवायिकारणं चा(१)पेक्षत एव तथा भूयोऽवयवजन्यद्रव्ये(२) कर्तव्ये(३) परस्परस्वाजनकसंयोगापेक्ष(४)स्तथापि स्वाजनकविजातीयभावभूतानपेक्षत्वं संयोगस्य विवक्षितम् । एतेनेति । स्वोत्पत्त्युत्तर(५)भाविभूतानपेक्षत्वमित्यर्थः(६) । तेन समवायिकारणप्रतिबन्धकाभावयोरपेक्षा लभ्यते । स्पर्शवेगाविति । स्पर्शवेगयोः पूर्वयद्यप्यभिघातजनकत्वमुक्तं तथापि यत्राभिघाताश्रये द्रव्ये विपरीतं कर्मोत्पद्यते तत्र विपरीतवेगोऽभिघातेनापेक्ष्यते तथा स्पर्शोऽपि ।

अपेक्षणीयस्येति । स्वजनकभिन्नापेक्षत्वं (७)स्वाजनकविजातीयापेक्षत्वं चात्र (७)विवक्षितम् । प्रचयस्तु कारणमहत्त्वमपेक्षत इति पूर्वमेवोक्तमिति न तत्राव्याप्तिः । लक्षणस्वरूपाज्ञाने तत्र प्रकारप्रश्नो न सङ्गच्छत इत्युभय(८)प्रश्नपरत्वमाह— किं लक्षणमिति । ननु प्रतीतिः प्रत्येतव्यस्य लक्षणमिति सुप्रसिद्धमेवेत्यतः प्रश्नविषयमाह— प्रतीतिरिति । प्रतीतिमात्र-

(१) च—इति नास्ति (क) पु० ।

(२) भूयोऽवयवे द्रव्ये—इति (क) पु० ।

(३) कर्तव्ये—इति नास्ति (क) पु० ।

(४) परस्परं स्वाजनकसंयोगोऽपेक्ष्यः—इति (ख) पु० ।

(५) काल—इत्यधिकं (ख) पु० ।

(६) अनपेक्षत्वेनेत्यर्थः—इति (ख) पु० ।

(७)-(७) नास्ति (क) पु० । वा तत्र० इति (ख) पु० ।

(८) उभयत्र—इति (ख) पु०



प्रतिव्यापकं संयुक्तप्रतीतिविषयत्वं च(१) प्रत्येतव्यविशेषाधीनमतः (२)प्रत्येतव्यविशेषस्यैव लक्षणत्वसंभवे प्रतीते(३)र्व्यर्थत्वमतः प्रत्येतव्यनिष्ठधर्मविशेषप्रश्न इत्यर्थः ।

अप्राप्तयोरिति । प्रागभावप्रतियोगी सम्बन्ध इत्यर्थः । जातिमान् सम्बन्धः सम्बन्धो वा संयोग इत्यपि लक्षणं(४) द्रष्टव्यम् । यद्यपि सम्बन्धो न संयोगः आत्माश्रयात् । नापि समवायो विरोधात् । तथापि कर्मासमवायिकारणानेकाश्रितवृत्तिगुणत्वव्याप्यजातिमत्त्वं लक्षणम् । लक्षणान्तरं च द्रव्यासमवायिकारणवृत्तिगुणत्वव्याप्यजातिमत्त्वं गुणविशेषासमवायिकारणवृत्तितज्जातिमत्त्वं कर्मविशेषासमवायिकारणवृत्तितज्जातिमत्त्वं च पूर्वमुक्तम् ।

तदभिमुखेति । तत्संयोगानुकूलक्रियाशून्यत्वं निःक्रियत्वं(५) विवक्षितम् । तेन यत्रैकः स्वाभिमुखीं दिशं गच्छत्यन्यश्च तत्पृष्ठमनुगच्छति तत्र सक्रियस्यापि सक्रियेणान्यतरकर्मजः संयोग इत्यर्थः । दृश्यादृश्येति । एकदिगभिमुखेनापरस्याप्रत्यक्षत्वं दिशो विरोध इत्यर्थः । यथेतीति । यद्यपि कर्मणः कर्मत्वेनैव संयोगं प्रति कारणत्वात्प्रत्येकमेव कर्मणोः संयोगज-

(१) विषयत्वस्य—इति (क) पु० ।

(२) विशेषस्यैव लक्षणत्वसम्भवे व्यर्थमतः—"इति (क) पु० ।

(३) प्रतीतेः—इति नास्ति (क) पु० ।

(४) लक्षणं—इति नास्ति (क) पु० ।

(५) निश्चलत्वं—इति (क) (ख) पु० ।

नकत्वमिति संयोगद्वयमेवोत्पत्तुमर्हति तथापि संयोगद्वयस्याननुभवात् कर्मभ्यां संभूयैक एव संयोगो जन्यते । अत एव नैककर्मणान्यस्यान्यथासिद्धिः विनिगमकाभावादुभयोरप्यारम्भकत्वात् ।

ननु कर्मत्वेनैव संयोगजनकत्वात्कपालद्वयजन्यघटवदवान्तरभेदाभावात् कथं त्रैविध्यम् ।

अत्राहुः । जातिभेदं विनाप्यन्यतरकर्मजत्वाद्युपाधिभेदेनैव विभागः ।

यद्वा । कस्यचित्संयोगस्य यावत्स्वाश्रयविभागविरोधित्वं कस्यचिन्नेत्यवान्तरभेदस्यावश्यकत्वात्तत्र चान्यतरोभयकर्मणामेव प्रयोजकत्वम् ।

एकस्मादित्यादि । एकतन्तुमात्रसंयुक्तकारण(१)संयोगाद्वितन्तुकतत्संयोगः तन्तुद्वयसंयुक्ताकाशसंयोगद्वयजन्यः पटाकाशसंयोगः बहुसमवायिकारणसंयुक्ततुर्यादिसंयोगजः पटतुर्यादिसंयोग इत्यर्थः ।

आरम्भकत्वसूचना(२)प्रयोजनमाह—संयोगेति । द्व्यणुकद्वयोत्पत्तिप्रयोजनमाह—युगपदिति । पार्थिवद्व्यणुकेनाप्यपरमाणोरेकः, आप्यद्व्यणुकेन पार्थिवपरमाणोरपरः, तदेतत्संयोगद्वयम् । तामाहेति । तां युगपत्संयोगस्योत्पत्तिमित्यर्थः । उत्पत्तिकारणस्योक्तत्वात् ज्ञप्तिकारणतया व्याचष्टे—किं प्रमाणमिति । तत्संयोगिकार्यत्वादिति । यत्रैकावयवसंयोग्यपरावयवकार्योऽवयवी न स्वावयवसंयुक्तः तत्रानैकान्तिकं स्यादत उक्तम्—तदकार्यत्व इति । यद्यपि संयोगिकार्यत्वादित्यत्र संयोगस्य नोपलक्षणत्वं व्यभिचारात् न विशेषणत्वमसम्भवात् पार्थिवाप्यपरमाणुसंयोगस्य द्व्यणुकाजनकत्वात् । तथापि पार्थिवः परमाणुः जलद्व्यणुकसंयोगी जलद्व्यणुकाजनकत्वे सति जलद्व्यणुकसमानाधिकरणासमानकालीनसंयोगाश्रयत्वात् यदेवं तदेवमिति व्याप्तिः । पौनरुक्त्यमाशङ्क्याह—तमेनमिति । एनममुम् । नैयायिकं व्याप्तिसाध्यम् । (१)प्रत्यामनन्ति स्वीकुर्वन्तीत्यर्थः । यद्वा । नैयायिक(१) पक्षसम्बन्धिसाध्यरूपम् । प्रत्यामनन्ति साध्यरूपत्वमस्य दर्शयन्तीत्यर्थः । तज्जनकेनेति । परमाणुद्व्यणुकसंयोगजनकेनेत्यर्थः । तथा च तदुत्पत्तिसमकालमेव द्व्यणुकयोः संयोगः(२) स्यादिति भावः ।

तस्मिन्निति । कार्यस्याकारणेन संयोगः कारणसंयोगपूर्वक एव । न च तस्मिन् काले द्व्यणुकस्य द्व्यणुकान्तरकारणेन सह संयोगः पूर्वकालवृत्तिर्भवति । युगपदुत्पत्तौ पूर्वकालसत्त्वादित्यर्थः(३) । कारणसंयोगिनैवेति । पूर्ववर्तिकारणसंयोगवतैवेत्यर्थः । तथा च पूर्वपरमाणुद्व्यणुकसंयोगोऽवश्यं वाच्य इति भावः ।

(१) संयुक्ताकाश—इति [ख] पु० ।

(२) सूचन—इति (ख) पु० ।

(१)–(१) नास्ति (क) पु० ।

(२) द्व्यणुकसंयोगः—इति (ख) पु० ।

(३) पूर्वकालसत्त्वाभावात्—इति (ख) पु०

**संयोगो हीति ।** अवयविनि कर्मोत्पादो यावदवयवकर्मोत्पत्तिनियत इति श्येनकर्मोत्पत्तिकाले चरणेऽपि कर्मोत्पादात् कर्मवति कर्मानुत्पत्तेः पूर्वोत्पन्नतच्चरणकर्मणो नाशात् श्येनस्थाणुसंयोगः कर्मज एव । अपि च संयोगकर्मणोस्तृणारणिमणिन्यायेन कारणत्वे कार्ये वैजात्ये मिथो विरुद्धजात्योरेकत्रासम्भवः । न चोभयकारणजन्यं प्रत्येकजन्यद्विजातीयमेवेति वाच्यम् । तादृशजातेर्योग्यानुलम्भबाधितत्वा(१)त्संयोगद्वयं पृथगेव जन्यत इति भावः ।

अजसंयोगस्य(२) नित्यत्वाद्विभागनाश्यगुणत्वं संयोगलक्षणं नास्तीत्यत उक्तम्—**अजसंयोगमिति** । नन्वन्यतरकर्मजोदाहरणं पुनरुक्तमित्यत आह—**नन्विति** ।

**यथाश्रुत इति ।** आत्मा नास्तीतिवात्सिद्ध्यसिद्धिभ्यां व्याघातादित्यर्थः । **अव्याप्यवृत्तिरिति** । परमाण्वाकाशसंयोगो न व्यापकः संयोगत्वात् कपिवृक्षसंयोगवत् । न चाप्रयोजकत्वम् । परमाणोराकाशव्यापक(३)त्वे परमाणुत्वव्याघातात् । ननु दृष्टान्तेऽवयववानामवच्छेदकत्वादाकाशे तत्सम्भव इत्यत आह—**प्रदेशश्चेति** । अवयवाभावेऽपि संयोग्यन्तरस्यैवावच्छेदकत्वम् । तत्राप्यन्य एव तदवच्छेदक इत्यर्थः । नन्वेवमुपाधय एव

---

(१) निरस्तत्वादिति—इति (क) पु. ।
(२) अजसंयोगे—इति (क) (ख) पु. ।
(३) परमाणोरपि व्यापकत्वे—इति (ख) पु. ।



तदाश्रया न तूपहित आवश्यकत्वादित्यत आह—**न चेति** । शाखावच्छेदेन वृक्षः कपिसंयोगीत्यनुभवो न तु शाखैव कपिसंयुक्तेति । **उक्तमिति** । न हि कार्यभेदेन शक्त्यशक्ती कार्यमेवाश्रयेते(१) इत्यादिना । **अपि चेति ।** सर्वत्रावयविन्यवयवसंयोगेनान्यथासिद्धौ परमाणावेव संयोगपर्यवसानात् संयोगोऽतीन्द्रियः स्यादिति तत्साक्षात्कारव्याघात इत्यर्थः । न च त्रसरेणोरवयवावच्छेदाग्रहात्तत्र नान्यथासिद्धिः । तत्रापि दिगुपाधीनामेवावच्छेदकत्वसम्भवात् ।

ननु चाव्याप्यवृत्तित्वं न स्वाभावसामानाधिकरण्यम् । रूपादीनामपि स्वान्योन्याभावसामानाधिकरण्यात् । नापि स्वसंसर्गाभावसामानाधिकरण्यम् । रूपादीनां स्वप्रागभावसामानाधिकरण्यात् । नापि स्वात्यन्ताभावसमानाश्रयत्वम् । अत्यन्ताभावत्वव्याघातात् । किञ्च एकत्रैकदैकस्य भावाभावयोर्विरोधबलात् तत्र प्रतीतिभ्रम(२) एव कुतो न स्यात् ।

मैवम् । स्वप्रतियोगिसमानकालसंसर्गाभावस्यैवात्यन्ताभावत्वात् । अन्यत्रात्यन्ताभावस्य प्रतियोगिवैदेश्यनियमेऽपि शाखायां वृक्षः कपिसंयुक्तो न मूले इत्यवच्छेदभेदेन प्रतीतेर्विरोधस्यैवाभावात् । येन प्रकारेणैकधर्म्युपसंहारात्तयोर्विरोधः ततोऽन्येनापि प्रकारेण यदि विरोधः स्यात्तदोभयोच्छेदप्रसङ्गः ।

---

(१) आश्रयत--इति (क) (ख) पु. ।
(२) तत्प्रतीतिभ्रम--इति (ख) पु. ।

किं च तुल्यन्यायतया संयोगाभावोऽपि (१)वृक्षे न वर्तेत इति भावाभावयोरुभयोरुच्छेदप्रसङ्गः । न च प्रतियोगिसमानदेशत्वेनात्यन्ताभावस्यान्योन्याभावत्वापादनम् । व्याप्यवृत्तित्वस्योपाधित्वात् ।

नन्ववच्छेदकस्यावयविनोऽर्थान्तरत्वे तत्र संयोगवृत्त्यवृत्तिभ्यामवयविनि वृत्त्यवृत्ति(२)विरोधे न कश्चिदुपयोगोऽनर्थान्तरत्वे च तदवस्थ एव विरोधः ।

अत्राहुः । संयोगस्यावयविनि समवायेऽप्यवयवान्तरा(४)वच्छेदप्रतीतिबलात् कस्मिंश्चिदवयवे तस्याधारता, न सर्वत्रेत्यव्याप्यवृत्तित्वार्थः ।

यद्वाऽवयवयसंयोग एवोपलभ्यमानेऽवयविनि संयोग उपलभ्यते । यत्र त्ववयवे संयोगाभावस्तस्मिन्नुपलभ्यमानेऽप्यवयविनि स नोपलभ्यत इत्यव्याप्यवृत्तित्वार्थः ।

**सावयवस्यैवेति** । सावयवावयवस्यैवेत्यर्थः । **भेर्यामिति** । विभु(५)विशेषगुणानां यावत्यसमवायिकारणं तावत्यवश्यंभावादित्यर्थः । तस्मादिति(६) । आकाशादयः कर्मजन्य-

( १ ) तुल्यन्यायेन यदि संयोगाभावोऽपि न वर्तते तदा संयोगोऽपि=इति (ख) पु० ।

( २ ) वृत्ति-इति नास्ति (ख) पु० ।

( ४ ) समवायेऽप्यवान्तरा०-इति ( क ) पु० । समवायेऽवयवा० इति (ख) पु० ।

( ५ ) विभु-इति नास्ति (क)

( ६ ) तस्मादाकाशादय इति--इति (क) (ख) पु० ।



संयोगाश्रया इत्यत्र साध्ये द्रव्यत्वादिति हेतुः । कारणाकारणसंयोगजन्यपरमाणुसंयोगाश्रयेणावयविनानैकान्तिकः स्यादिति नित्यद्रव्यत्वे सतीत्युक्तम् । निःक्रियत्वं तु विभुकर्मणा संयोगो नास्तीति ज्ञापनार्थम्(१) । विभुपरमाणुसंयोगः कर्मजः संयोगाजन्यसंयोगत्वादिति हेत्वन्तरसूचनाय निःक्रियत्वमित्युक्तमित्यप्याहुः ।

यद्यप्यनेन कर्मजसंयोगसिद्धावपि नाजसंयोगाभावः सिध्यति । तथाप्याकाशं कर्मजन्यपरमाणुसंयोगानाश्रयः अमूर्तत्वाद्रूपवदिति । न चाद्रव्यत्वमुपाधिः । तुल्ययोगक्षेमत्वात् । व्यर्थविशेषणत्वाच्च । **मूर्तसंयोगित्वादिति** । संयोगित्वादित्येव हेतुः । मूर्तेति तु संनिधानात्संयोगित्वं(२) कालेनैव सहोक्तं तच्चासिद्धमिति भ्रमापाकरणायोक्तम् । न च मूर्तत्वमुपाधिः । कालवृत्तिसंयोगाश्रयत्वस्य कालेऽपि वृत्तेः साध्याव्यापकत्वात् ।

**विभव इति** । यद्यपि युतसिद्धिमात्राभावोऽसिद्धः परस्परं युतसिद्ध्यभावे च प्रतियोग्यप्रसिद्धिस्तथाप्याकाशं न कालसंयोगि कालसंयोगप्रागभावशून्यत्वात् रूपवत् । न चाद्रव्यत्वमुपाधिः । व्यर्थविशेषणत्वादप्रयोजकत्वाच्चेति भावः(३) ।

( १ ) ज्ञापनायोक्तम्—इति [क] [ख] पु० ।

( २ ) संयोगित्वं—इति नास्ति [क] पु० ।

( ३ ) विशेषणत्वादित्येव भावः—इति [क] पु० । विशेषणत्वादित्यत्र तात्पर्यम् । इति (ख) पु० ।

हेतोः द्रव्यत्वादित्यस्येत्यर्थः । अनुकूलेति(१) । न च संयोगसमवायिकारणत्वेन द्रव्यत्वसिद्धेस्तदनुपपत्तिरेवानुकूलतर्कः । द्रव्यान्तरसंयोगित्वेनापि तदुपपत्तेः । प्रतिकूलेति । कालाकाशयोर्मिथः संयोगित्वेऽयुतसिद्धिप्रसङ्गादित्यर्थः(२) । ननु पृथग्गतिमत्त्वमवयवावयविनोरप्यस्तीति तयोरपि युतसिद्धिप्रसङ्गः । न हि यदेव कर्मावयवे तदेवावयविनीत्यत आह—विभागहेत्विति । अवयवावयविनो(३)र्भिन्नगतिमत्त्वेऽपि(३) मिथो विभागजनिका गतिर्नास्तीत्यर्थः । नन्वेवं घटपटयोरनुत्पन्नपरस्परविभागजनककर्मणोर्न युतसिद्धिः स्यादित्यत आह—युताश्रयत्वमिति । इयमिति । पृथगाश्रयत्वपृथग्गतिमत्त्वयोरन्यतरत्संयोगव्यापकमित्यर्थः । विभुपरमाण्वोः पृथगाश्रयत्वाभावात् घटपटयोः पृथग्गतिमत्त्वाभावात् प्रत्येकमव्यापकत्वादत आह—उभयेति । न तूत्तरकालमिति । संयोगजनकयोः संयोगकर्मणोर्विभुनोरभावादित्यर्थः । विशेषाविशेषयोरिति(४)। युतसिद्धेर्विशेषौ पूर्वोक्तावित्यर्थः । तथाच यावद्विशेषाभावे विभुनोर्युतसिद्धिसामान्यस्य संयोगव्यापकस्याभावात्तद्व्याप्यस्य संयोगस्याप्यभावः । द्रव्यत्वे सतीति नित्यगुणव्यावर्तनाय । तयोरेवेति । समानाधिकरणस्यैव विरोधिगुणस्य नाशकत्वा-

( १ ) अनुकूलतर्काभावादिति—इति (क) (ख) पु० ।
( २ ) प्रतीघातावित्यर्थः—इति (क) (ख) पु० ।
( ३ )-( ३ ) नास्ति क० पु० ।
( ४ ) विशेषाविशेषाविति—इति (क) (ख) पु० ।



दिति भावः(१) । तद्विनाशादिति । न चाश्रयनाशकादेव युगपदाश्रयाश्रितनाशोऽस्त्विति वाच्यम् । आश्रयनाशकापेक्षया आश्रयनाशस्यैव लघुत्वेन कारणत्वात् । तुल्यकालयोरिति । समवायिकारणत्वस्य समवायगर्भत्वादित्यर्थः ।

संयोगसिद्धावनुमानमप्याहुः । गगनपवनसंसर्गजन्मा शब्दो रूपादित्रयोविंशतिगुणासमवायिकारण(२)शून्योऽयं गुणासमवायिकारणकः शब्दत्वात् द्वितीयशब्दवदिति । ननु चातीन्द्रियो(३) विभागो न विभक्तप्रत्ययनिमित्तमिति तत्राव्याप्तिरदृष्टादेरपि तन्निमित्तत्वादतिव्याप्तिश्चेत्यत आह —निमित्तमितीति । अनेनायं विभक्त इत्यस्यां बुद्धौ यद्विशेषणत्वेन भासते गुणः स विभाग इत्यर्थः । अतीन्द्रियस्यापि विभागस्य विशेषणत्वमस्त्येव व्यावृत्तिधीजनकधीविषयत्वात्(४) । प्रमाणेति । प्रतीतिपदेन प्रत्यक्षं प्रमाणमुक्तं विभागशब्द(५)प्रयोगेण च शब्दात्मना तत्सहायस्तर्को दर्शितः । संयोगाभाव इति । अनन्तसंयोगसंसर्गाभाव इत्यर्थः । रूपेति । रूपादौ संयोगा(६)त्यन्ताभावस्य

( १ ) इत्यर्थः—इति (क) (ख) पु० ।
( २ ) कारणकत्व—इति (क) पु० ।
( ३ ) नन्वतीन्द्रियो—इति (क) (ख) पु० ।
( ४ ) व्यावृत्तिधीजनकत्वात्—इति । (क) पु० । व्यावृत्तत्वधीजनकत्वात्—इति (ख) पु० ।
( ५ ) निमित्तशब्द—इति (क) पु० । विभक्तशब्द—इति(ख)पु० ।
( ६ ) संसर्गा—इति (क) पु० ।

विद्यमानत्वादिति भावः । संयोगाविनाश इति । तस्य च संयोगसमानाश्रयत्वान्नोक्तदोषः ।

ननु संयुक्तविभक्ते पुनः संयोगान्तरवति पूर्वसंयोगनाश(१)सत्त्वाद्विभागधीप्रसङ्गः । यावदुत्पन्नसंयोगध्वंसस्य विवक्षितत्वे यत्रैक एव संयोगो नष्टस्तत्र यावदर्थाभावादव्याप्तिः ।

मैवम् । संयोगत्वावच्छिन्नप्रतियोगिकध्वंसस्य विवक्षितत्वात् । (२)सामान्याभावस्य च यावद्वि(२)शेषाभावव्याप्यत्वेनैकसंयोगवत्यभावात् । (३)स्वसमानाधिकरण(३)संयोगासमानकालीनस्य वा संयोगध्वंसस्य विभागधीविषयत्वात् । युक्तं चादः(४) । विभागस्योत्तरदेश(५)संयोगनाश्यतया क्षणमात्रस्थायित्वात्तदुत्तरक्षणे विभक्तप्रतीतेः संयोगध्वंसालम्बनत्वेन त्वयाप्यनुमतेरिति भावः(६) । प्रमेयाधिक्येति । ननु द्वित्वमेवाधिकं स्यात् ।

अत्राहुः । विशेषणज्ञानं विशेष्य (७)सन्निकर्षस्तयोरसंसर्गा-

---

( १ ) ध्वंस—इति (क) (ख) पु० ।

( २ )-( २ ) सामान्यावच्छिन्नाभावस्य तत्तद्धर्मावच्छिन्नतावत् इति (ख) पु० ।

( ३ )-( ३ ) नास्ति (क) पु० । स्व इति नास्ति (ख) पु० ।

( ४ ) चैतत्—इति (क) (ख) पु० ।

( ५ ) देश—इति नास्ति (ख) पु० ।

( ६ ) भावः—इति नास्ति (क) (ख) पु० ।

( ७ ) इन्द्रिय--इत्यधिकं (ख) पु० ।



ग्रह इत्येव विशिष्टप्रत्यक्षसामान्यकारणं (१) न तु विशेषणस्यैकत्वानेकत्वे अपि तन्त्रम् । अनेनायं विभक्त इति द्वित्वानुल्लेखी (२) व्यवहारश्च न स्यात् । अपि च । द्वित्वान्तर्भावेनैव विभागपदार्थत्वे द्वौ विभक्ताविति सह प्रयोगो न स्यात् । तथापि द्रव्यध्वंसाजन्यः संयोगध्वंसो विभक्तधीविषयः स्यात् ।

मैवम् । घटात्पटो विभक्त इत्यनुभवाद्विभागस्य पृथक्त्वस्येव सावधित्वात् । ध्वंसस्य च सप्रतियोगिकत्वात् । अवधित्वप्रतियोगित्वयोर्भेदस्योक्तत्वात् । संयोगनाशानन्तरमाश्रयनाशे ध्वंसप्रतीतौ सत्यामपि विभक्तप्रतीतेरभावात् । विभागः सन्नित्यबाधितधीवेद्यत्वात् । शब्दसंयोगाजन्यशब्दासमवायिकारणत्वात् । विभागाभावस्य संयोगत्वापत्तौ विनिगमकाभावाच्च । न च संयोगाभाव एव विभागधीः कथमन्यथा हिमवद्विन्ध्यौ विभक्ताविति प्रत्यय इति वाच्यम् । विभागपदस्य नानार्थत्वात् । एवं सत्यनुमानमप्याहुः । संयोगत्वं द्विवृत्तिमात्र(३)वृत्तिगुणत्वसाक्षाद्व्याप्यजातिभिन्नं मेयत्वात्(४) घटवत्(५) ।

विभागे मानान्तरमाह—न चेति । ससमवायिकारणक-

---

( १ ) सामान्ये कारणं--इति (क) पु० ।

( २ ) नुल्लेखे—इति (क) (ख) पु० ।

( ३ ) द्विष्ठमात्र—इति (क) (ख) पु० ।

( ४ ) प्रमेयत्वात्--इति (क) पु० ।

( ५ ) घटवत्—इति नास्ति (क) पु०

गुणनाशे(१) समानाधिकरणविरोधिगुणस्य कारणत्वादित्यर्थः । ननु गुणत्वमतन्त्रं किन्तु समानाधिकरणविरोधिमात्रं लाघवादित्यभिप्रेत्याह—कर्मैवेति । संदिग्धत्वादिति । कर्म साक्षात्संयोगनाशकं परम्परया वेति संशयादित्यर्थः । विश्लेषो द्रव्यारम्भकसंयोगनाशः ।

कारणस्यैवेति । समवायिकारणस्यैवेत्यर्थः । (२)एवं सत्यङ्गुल्यामिति(३) । न चाङ्गुली(४)तरुवृत्तिः संयोगनाश एव समानाधिकरणो विरोधी धर्मः हस्ततरुसंयोग(५)विनाशकः स्यादिति वाच्यम् । आश्रयनाशाजन्यगुणध्वंसस्य विरोधिगुणजन्यत्वनियमात् । समानाधिकरणस्य भावस्यैव नाशकत्वाच्च । हस्ततरुसंयोगनाशो न स्यादिति ।

ननु हस्ततरुसंयोगनाशाभावे साध्ये हस्तादीनां निष्क्रियत्वादित्यादि हेतुद्वयं व्यधिकरणम् । न चाङ्गुरी(६)कर्म न हस्ततरुसंयोगनाशकं तरुहस्तावृत्तिकर्मत्वादिति वाच्यम् । कर्ममात्रस्यैव संयोगनाशकत्वानभ्युपगमेन व्यर्थविशेषणत्वात् कर्मत्वा-

---

(१) समवायिकारणसमानकालीनगुणनाशे--इति (ख) पु० ।

(२) व्यधिकरणधर्मस्य विनाशकत्वेऽतिप्रसङ्गमाह--जातिमात्रेणेति । इत्यधिकं (ख) पु० ।

(३) सत्यङ्गुर्यामिति—इति (क) पु० ।

(४) री—इति (क) पु० ।

(५) हस्ततत्संयोग—इति (ख) पु० ।

(६) ली—इति (ख) पु० ।



दित्येतावन्मात्रस्य परं प्रत्यसिद्धेः(१) । व्यधिकरणस्याप्यदृष्टस्य नाशकतया व्यभिचाराच्च ।

मैवम् । हस्ततरुसंयोगनाशः नाङ्गुरीकर्मजन्यः संयोगनाशत्वात् समानाधिकरणभावजन्यो वा आश्रयनाशाजन्यसंयोग(२)ध्वंसत्वादित्यस्य विवक्षितत्वात् ।

तस्मादिति । विभागजविभागपरम्परयेत्यर्थः । कर्मजनितहस्तसंयोगस्यासमवायिकारणनाशो न नाशक इति तन्नाशकत्वेन विभागसिद्धौ कर्मसमानाधिकरणसंयोगस्यापि स एव नाशकः कर्म च विभागजननेनान्यथासिद्धमिति भावः(३) ।

यद्यपि नेदं प्रत्यक्षमानम् अनुमानपरत्वे च हेतुशून्यता(४) । तथापि प्रागुक्तविभागग्राहकस्तर्कोऽनेन दर्शितः । अत एव(५) वक्ष्यति तमिममनुग्राहकमिति ।

व्यधिकरणमपीति । क्लृप्तत्वाद्गुणान्तरकल्पने च गौरवादिति भावः । असति बाधक इति । संकोचकस्यैकदेशबाधात्मकतया बाधकमन्तरेणासत्त्वादित्यर्थः । आश्रयाश्रितपरम्परायाश्चाननुगतत्वादिति भावः । कार्येणेति । त्रयोविंशतिगुणासमवायिकारणकत्वशून्यस्य शब्दस्य गुणासमवायिकार-

---

(१) परं प्रति व्याप्यत्वासिद्धेः—इति (ख) पु० ।

(२) संयोगस्थाने गुण—इति (ख) पु० ।

(३) विभागजननेऽन्यथासिद्धमित्यर्थः—इति (क) (ख) पु० ।

(४) शून्यत्वम्--इति (क) (ख) पु० ।

(५) अत एव च--इति (क) पु० ।

णानुमानादित्यर्थः(१) । तत्त्वात् असमवायिकारणत्वादित्यर्थः ।

प्रत्यासत्त्यभावेनेति । कार्यैकार्थप्रत्यासत्तिकारणैकार्थप्रत्यासत्त्योरभावेनेत्यर्थः । न च वंशदलद्वयसंयोगनाशापेक्षो वंशदलाकाशसंयोगोऽसमवायिकारणम् । संयोगासमवायिकारणशब्दस्य संयोगनिमित्तकारणकत्व(२)व्याप्तेः । भेर्याकाशसंयोगजशब्दे भेरीदण्डसंयोगनिमित्तकारणतादर्शनात् ।

लक्षणमाहेति । विभागो विभक्तप्रत्ययनिमित्तमित्यस्य प्रमाणो(३)पदर्शकत्वादित्यर्थः । यद्वा । अजविभागव्यवच्छेदकं लक्षणान्तरमित्यर्थः । तथाच वक्ष्यति अजो विभागो नास्तीति । संयोगनाशक इति द्विष्ठतया विशेषणान्नादृष्टेऽतिव्याप्तिः ।

अन्यतरकर्मज इति । विभक्ताविभागोऽयम् । प्रथमं विभागो द्विविधः कर्मजो विभागजश्चेति विभागात् । यद्यप्युभयदण्डजत्वादिना घटे विशेषानुपलम्भाद्विभागेऽप्युभयकर्मजत्वं न विशेषस्तथापि अन्यतरकर्मजे उभयकर्मजे च विभागे अन्यतरस्योभयस्य(४) चावधित्वं प्रतीयते । यत्र कर्मोत्पद्यते तन्निष्ठविभागेऽन्यस्यैवावधित्वात् । एतादृशश्च(५) कार्ये विशेषः

(१) कारणकत्वानुमानादित्यर्थः--इति (क) पु० । कारणकत्वादित्यर्थः--इति (ख) पु० ।

(२) कारणत्व--इति (क) पु० । कारण--इति नास्ति (ख) पु०

(३) प्रत्यक्षप्रमाणो--इति (क) (ख) पु० ।

(४) उभयस्य--इति नास्ति (ख) पु० ।

(५) च--इति नास्ति (ख) पु० ।



कारणाधीन एव वाच्यः । ननु यदा तदेत्यभिधानात् कालान्तरे कर्मणो विभागजनकत्वं(१) स्यादेवेत्यत आह—यद्यपीति । ननु क्रमकल्पनेयमनुपपन्ना युगपद्विभागानां प्रत्ययात् क्रमानुपलब्धेश्चेत्यत आह—अयमर्थ इति । अथ द्रव्यारम्भकसंयोगविरोधिविभागजनकस्याविरोधिविभागजनकत्वाभावस्य(२) क्वाप्यदर्शनात्तदविरोधिविभागजनके विरोधि(३)विभागजनकत्वाभावस्य च विकसत्कमलदलादौ दर्शनाद्विभागस्य द्रव्यारम्भकसंयोगविरोधित्वाविरोधित्वप्रयोजकं वैजात्यं स्वजनककर्मणो मिथो विरुद्धजातीयत्वं विनानुपपन्नं तत्कल्पयति । न चैकत्र कर्मणि विरुद्धे जाती वर्तेते इति नोभयविभागजनकत्वमेकस्य कर्मणः सम्भवतीत्यर्थः । अन्यथा द्रव्यानारम्भकसंयोगविरोधिन्याः क्रियाया नियमेन विरोधिविभागजनकत्वे चलत्येवावयवे द्रव्यनाशापत्तेः । न च तत्रान्यत् कमलम् । तत्त्वेन ग्रहात् । न चानियमेन तथास्त्विति वाच्यम् । विकसत्कमलदलादौ तददर्शनसम्भवेनैवंभूतं कर्म तद्विरोधिविभागं न जनयतीति नियमावधारणात् ।

नन्वस्तु विभागवैजात्यात्कर्मवैजात्यं तथापि पाट्यमानवंशदले द्रव्यारम्भकानारम्भकसंयोगविरोधिविभागजनकत्वेन कम-

(१) विभागान्तरजनकत्वं--इति (क) (ख) पु० ।

(२) अभाव—इति नास्ति (क) पु० । संयोगविरोधिविभागजनके कर्मणि तदविरोधिविभागजनकत्वाभावस्य—इति (ख) पु० ।

(३) तद्विरोधि—इति (ख) पु० ।

लदले त्वनारम्भकसंयोगविरोधिविभागमात्रजनकत्वेन किं वैजात्यं किं वा भवदुक्तरीत्येति संदिह्यते । तथा चानारम्भकसंयोगविरोधिविभागजनकत्वं कर्मणः सामान्यत एव विशेषादारम्भकसंयोगविरोधिविभागजनकत्वमपि स्यात् विभागयोर्यौगपद्यदर्शनादित्याशङ्क्य निराकरोति न च वाच्यमिति ।

(१)कार्यविरोधस्येति(१)। वंशदलकर्मणो(२) द्रव्यारम्भकसंयोगविरोध्यविरोधिविभागद्वयजनकत्वसंदेहेऽपि विरोध्यविरोधिविभागद्वयलक्षणविरुद्धजातीयकार्यनिश्चयेन कार्यकारणभावग्रहप्रवृत्तेरप्रत्यूहात्(३)। अन्यथा सर्वत्र प्रयोजकरूपान्तरशङ्कया तन्निश्चयः क्वापि न स्यादित्यर्थः । ननु वंशे(४) पाट्यमाने तद्दलकर्मणा विरोधिविभागजनकं विरोधिविभागजनकत्वादित्यन्वयिनि दृष्टान्ताभावः(५)। द्रव्ये व्यभिचारश्च तस्योभयविभागजनकत्वात् । अत एव न व्यतिरेके कमलदलदृष्टान्तेन व्यतिरेकी । द्रव्य एव विरुद्धत्वात् । न च कर्मत्वेन विशेषणाद्धेतोर्नायं दोषः । सपक्षादपि रूपादेर्व्यावृत्तेरसाधारणत्वात् ।

मैवम् । वंशदलाकाशविभागो न द्रव्यारम्भकसंयोगविरोधिविभागजनककर्मजन्यः द्रव्यानारम्भकसंयोगविरोधिविभागत्वात् विकसत्कमलदलविभागवत् ।

---

(१)-(१) नास्ति (क)(ख) पु० ।
(२) वंशदले कर्मणो—इति (क) (ख) पु० ।
(३) अप्रत्यूहत्वात्—इति (क) पु० ।
(४) वंशदले—इति (ख) पु० ।
(५) इत्यत्रान्वयिदृष्टान्ताभावः—इति(ख) पु० ।



यद्वा । एतत्कर्म न द्रव्यानारम्भकसंयोगविरोधिविभागजनकं द्रव्यारम्भकसंयोगविरोधिविभागजनकत्वात्(१) । यत्र तन्त्वोरारम्भक एव संयोगः अवच्छेदकान्तरेण संयोगाभावात् तत्र तन्तुद्वयविभागजनकांशुतन्तुविभाग एव दृष्टान्तः । न चाविनश्यदवस्थकर्मत्वेन प्रतिरोधः । विपक्षे बाधकस्योक्तत्वादिति विवक्षितत्वात् ।

तत्रापीति । द्रव्यारम्भककारणद्वयसंयोगजनकं कर्म नाकाशादिसंयोगं जनयेत् इति कारणमात्रसंयोगपूर्वकाः कारणाकारणसंयोगाः कल्प्येरन् क्रमानुपलब्धिश्च तुल्येत्यर्थः । संयोगस्येति । उत्तरसंयोगमात्रे कर्मणः कारणत्वावधारणात् न तु (२)विभागमात्रेऽपि कर्मणा(२) सकलसंयोगिविभागस्याजननादिति नैकस्य कर्मणः संयोगद्वयजनने विरोध इत्यर्थः । तदेव स्फुटयति—अनारम्भकेति । नन्वनारब्धद्रव्यत्वादिविशिष्टेऽपि तन्त्वादौ वर्तमानो न सर्वः संयोगो द्रव्यारम्भक इति संयोगविशेषत्वेन द्रव्यारम्भकत्वम् अनारम्भकादिसमवेतत्वमात्रस्य च(३) व्यभिचारित्वात् । स च विशेषो जातिरूप एवेति संयोगयोर्वैजात्यात् तज्जनककर्मणोरपि विजातीयत्व(४)मावश्य-

---

(१) विरोधिविभागासमवायिकारणत्वात्—इति (ख) पु० ।
(२)-(२) विभागे कर्मणा—इति (क) (ख) पु० ।
(३) अनारब्धद्रव्यत्वादिसमवेतमात्रस्य—इति (ख) पु० ।
(४) विरुद्धजातीयत्व—इति (क) (ख) पु० ।

कमिति नैकस्य कर्मणो द्रव्यारम्भकानारम्भक(१)संयोगजनकत्वमतः कारणमात्रसंयोगजः कारणाकारणसंयोगः स्यादेव ।

अत्राहुः । सहकारिभेदसमवधानादेव तदुपपत्तौ संयोगवैजात्ये मानाभावः । तथा च कर्मणो(२) वैजात्यमसिद्धमिति व्याप्तेरसिद्धिः ।

ननु कमलदलकर्माकाशादिदेशादपि विभागं जनयत्येवेत्यत आह—**कर्मविशेष इति** । **विशिष्टादिति** । कमलदलविभागस्यातथात्वादित्यर्थः । ननु वंशे पाट्यमाने तद्दलक्रिया, ततो दलयोर्विभागः, ततो वंशदलसंयोगनाशः, ततो वंशदलावष्टब्धनभोविभागोऽस्तु, किं द्रव्यनाशापेक्षयेत्यत आह—**अयमभिसंधिरिति** । **विभागेन हीति** । कारणाकारणविभागेन कार्याकार्यविभागे जनयितव्ये कर्मानपेक्षं समानाधिकरणं कार्यद्रव्यमेवापेक्ष्यत इति भावः । **विभागोत्पत्तिरिति** । अङ्कुरीतरुविभागाद्धस्ततरुविभागोत्पत्तेरित्यर्थः । **तस्मादिति** । कार्यद्रव्यविनाशविशिष्टं कालमपेक्ष्यावयवविभागो नभोदेशविभागमारभत इत्यर्थः । **विवक्षेति** । एकत्र कालो विशेष्यो(३)ऽपरत्रावयव इति विवक्षावैचित्र्यमित्यर्थः । **द्रव्यं त्विति** । अवयवविभागो हि सति द्रव्यारम्भकसंयोगे द्रव्ये वा स एव

(१)-संयोगजनक-इति (क) पु० ।-संयोगजन्य-इति (ख) पु०
(२) कर्मणोर्न—इति (ख) पु० ।
(३) विशिष्टो—इति (ख) पु० ।



विभागं जनयति यो द्रव्यारम्भकसंयोगाविरोधी(१)ऽङ्गुरीतरुविभागादौ तथा(२) दर्शनादिति भावः । (३)नन्ववयवक्रिया द्रव्यानारम्भकसंयोगप्रतिद्वन्द्विनमेव विभागमारभत इत्येवास्तु । न च वेणुदलकर्मणि व्यभिचारः । तस्यापि तथात्वात् । वेणुदलविभागस्तु विभागज एवास्तु । न च क्रियानन्तरमेव वेणुदलविभागदर्शनान्नैवमिति वाच्यम् । वेणुदलाकाशविभागेऽपि तत्त्वापत्तेः ।

मैवम् । यौगपद्यबुद्धेरन्यथासिद्धेः । द्रव्यारम्भकसंयोगाविरोधिविभागजनकं कर्म न तद्विरोधिनं विभागं करोतीत्युक्तत्वात् । तादृशश्च विभागो द्रव्यारम्भकसंयोगविरोधिनं न जनयतीति कमलदलविभाग एव सिद्धत्वात् । अन्यथा सर्वत्र तन्नाशप्रसङ्गात् । न च कर्मणो विशेषोऽध्यक्षः किन्तु विभागयोर्वैलक्षण्यात् कल्प्यः । तथा च परस्परासंभिन्नावेव विशेषाविति क्व सांकर्यम् । वंशदलकर्मणः प्रथमोपस्थितदलद्वयविभागमेव प्रति कारणत्वमित्यप्याहुः । न च वंशैकदलकर्मणा दलयोर्जनितो विभागो निःकर्मदलाकाशविभागमपि जनयेदविशेषादिति वाच्यम् । तत्र चरणाद्यवष्टम्भस्यैव प्रतिबन्धकत्वात् ।

उत्पत्तेरनन्तरमिति । वस्तुतः कालान्तरेऽप्येकस्य कर्मणो

(१) संयोगाविरोधी—इति (ख) पु० ।
(२) तथा—इति नास्ति—इति (क) (ख) पु० ।
(३) नन्ववयवे क्रिया—इति (ख) पु० ।

न विरुद्धजातीयविभागजनकत्व(१)मिति भावः । नन्ववयवान्तराद्विभागं कुर्वत एव कर्मणः कमलदलाकाशादिग्देशविभागजनकत्वादवयवान्तराद्विभागमकुर्वदित्ययुक्तमित्यत आह—द्रव्यारम्भकसंयोगेति । अपेक्षाकारणमिति । निरपेक्षकत्वे कर्मत्वप्रसङ्गादित्यर्थः । ननु संयोगनिरूपणावसर एव संयुक्तसंयोगस्य व्यवस्थापनादिदानीमप्रकृतं तद्व्यवस्थापनं पुनरुक्तं चेत्यत आह-नन्विति(२) । यथैवमिति । अवयवचलनादिसामग्री यद्यवयविचलनादिसामग्र्यव्याप्या न स्यादित्यर्थः । असंयोगित्वादिति । ययोरेव संयोगस्तयोरेव विभागादित्यर्थः । अप्राप्तेरिति ।

न चाप्राप्तत्वमेव चलाचलत्वेना(३)पाद्यम् । भूमिसंयुक्ते वृक्षे चलत्यपि भूमेरचलत्वदर्शनादनैकान्तिकत्वात्(४) । गुणादावपीति(५) । चलाचलत्वेना(६)समवेतत्वे साध्येऽनैकान्तिकं चेत्यर्थः । न च द्रव्यत्वेन हेतुर्विशेष्यः । गुणादाविवावयविन्यपि समवायसिद्धेर्बाधात् ।

गुणगुणिनोरभेदबाधाह—एवमस्त्विति । समवाया-

(१) विभागे जनकत्वम्—इति (क) (ख) पु० ।
(२) ननु कारणवर्तिनेति । इति (क) (ख) पु० ।
(३) चलनाचलनेना—इति (क) (ख) पु० ।
(४) दर्शनेनैकान्तिकत्वात्—इति (ख) पु० ।
(५) गुणादाविति—इति (क) (ख) पु० ।
(६) चलनाचलनेना—इति (ख) पु० ।



सिद्धाविति । गुणगुणिनोरभेदस्य च पूर्वमेव निरासादिति भावः । नन्ववयवे चलत्यवश्यमवयवी चलः तत्र समवेतद्रव्यत्वात्(१) उत्क्षिप्तशरादिवत् । न चाप्रयोजकत्वम् । यस्मिंश्चलत्यपि यद्द्रव्यं न चलति तत्तत्र न समवैति यथा वस्त्रम् उदक इति विपक्षे बाधकात्(२) ।

मैवम् । अञ्चले चलत्यपि पटो न चलतीति प्रत्ययेन बाधात् । न च यत्र चले यत्कार्यद्रव्यमचलं(३) तत् पृथगाश्रयाश्रितमिति वाच्यम् । इष्टापत्तेः । अवयवावयविनोः स्वस्वसमवायिकारणे वृत्तेः ।

एतावतै(४)वाक्षेपे निरस्तेऽग्रिमप्रबन्धोपयोगार्थमाह—अथेति(५) । परस्परेति ।

नन्वेवं तन्तुपटयोरपि युतसिद्ध्यापत्तिः । तयोरन्योन्यपरिहारेणां—शुतन्तुलक्षणपृथगाश्रयसमवायात् ।

मैवम् । अंशुतन्त्वोराश्रययोर्मिथः संबद्धत्वेनाप्रत्यासन्नपृथगाश्रयसमवायाभावात् ।

अप्राप्तयोरिति । असमवेतयोरित्यर्थः । न चैवमयुतसिद्धानामित्यादिसमवायलक्षणे समवायिसिद्धानामित्यर्थे आत्मा-

(१) समवेतत्वात्—इति (क) पु० ।
(२) पक्षे बाधकात्—इति (क) पु० ।
(३) यत्कार्यमचलं—इति (ख) पु० ।
(४) तावतैव—इति (ख) पु० ।
(५) अथ भवत इति (क) (ख) पु० ।

ष्प्राप्तिः। नित्यसंबन्धत्वस्य(१) समवायलक्षणस्य तेनोक्तत्वात्। ननु विभागनाशे साध्ये उत्तरसंयोगावधिसद्भावादिति हेतुर्व्यधिकरण इत्यत आह—कारक इति। आशुतरविनाशित्वस्यासिद्धिमाशङ्क्याह–उत्तरेति। इष्टापत्तिं निराकरिष्यन् व्यतिरेकदृष्टान्तमुपपादयति—अयमिति(२)। नोदनादीति। आदिपदेनाभिघातसंग्रहः। नोदनं हि नोद्य(३)नोदकसंयोगे सति भवति। स चेद्यत्किञ्चिद्विभागाद्विनश्यति कथमुत्तरकाले नोदनमित्यर्थः। विनाशकारणाभावादिति। संयोगस्येति शेषः। उत्पादेति। अतः संयोगनाशानन्तरं संयोगान्तरोत्पत्तिर्नास्तीत्यर्थः। तत्र कार्यस्येति। अवयवसंयोगादिकार्यस्यावयव्यादेरित्यर्थः।

कार्यं चेति। यद्यपि विभागस्य ज्ञानसुखादिकमपि कार्यमुत्तरकालभावि संभवत्येव तथापि यो विभागः स उत्तरसंयोगोत्पत्त्यनन्तरं नश्यतीत्याश्रयनाशनाश्ये विभक्तयोर्झटिति संयोगे च दृष्टमतोऽत्रापि तदनुमेयमित्यर्थः। न च कर्मैवेति। यदि कर्मविनाश्यो विभागः स्यात्तदोत्पत्त्यनन्तरमेव नश्येदित्युत्तरविभागो न स्यात् कार्यासमानकालस्यासमवायिकारणत्वाभावादित्यर्थः। ननु तन्तुद्वयविभागवत्तन्त्वाकाशविभागेऽपि तन्तुकर्म-

---

(१) नित्यसम्बन्धस्य लक्षणस्य–इति (क) पु०। नित्यसम्बन्धस्य—इति (ख) पु०।

(२) अयमाशय इति—इति (क) (ख) पु०।

( ) नुद्य—इति (क) (ख) पु०।

# THE PRINCESS OF WALES SARASVATI BHAVANA TEXTS.

Edited by

GOPINATH KAVIRAJ, M. A.

No. 1—The Kiraṇāvāli Bhāskara, (किरणावलीभास्कर) [वैशेषिक], a Commentary on Udayana's Kiraṇāvalī, Dravya section, by Padmanābha Miśra.
Ed. with Introduction and Index by Gopinath Kaviraj, M.A. Rs. 1–12

No. 2—The Advaita Chintāmaṇi, (अद्वैतचिन्तामणि) [वेदान्त], by Rangoji Bhaṭṭa,
Ed. with Introduction etc. by Nārâyaṇa S'āstri Khiste Sāhityāchārya. Rs. 1–12

No. 3—The Vedânta Kalpalatikâ, (वेदान्तकल्पलतिका) [वेदान्त], by Madhusūdana Sarasvati.
Edited with Introduction etc. by Rāmājñā Pāṇḍeya Vyākaraṇāchārya. Rs. 1–12

No. 4—The Kusumāñjali Bodhanī, (कुसुमाञ्जलिबोधिनी) [न्याय], a Commentary on Udayana's Theistic Tract, Nyāya Kusumāñjali, by Varadarāja.
Ed. with Introduction etc. by Gopinath Kaviraj, M.A, Rs. 2–0

No. 5—The Rasasāra (रससार) [वैशेषिक], a Commentary on Udayana's Kiraṇāvalī, Guṇa Section, by Bhaṭṭa Vādīndra.
Ed. with Introduction etc. by Gopīnath Kaviraj, M.A. Rs. 1–2

No. 6—(Part I)-The Bhāvanā Viveka (भावनाविवेक) [मीमांसा], by Maṇḍana Miśra, with a Commentary by Bhaṭṭa Umbeka.
Ed. with Introduction etc. by M. M. Gaṅgānātha Jhā, M. A., D. Litt. Rs. 0–12

No. 6-(Part II)—Ditto Ditto Rs. 0–12

No. 7-(Part I)-The Yoginīhṛdaya dipikā, (योगिनीहृदयदीपिका) [तन्त्र], by Amṛtānanda Nātha, being a Commentary on Yoginīhṛdaya, a part of Vāmakeśvara Tantra.
Ed. with Introduction etc. by Gopīnath Kaviraj, M.A. Rs. 1–8

No. 7—(Part II) Ditto Ditto Rs. 1–4

No. 8—The Kāvyadākinī (काव्यडाकिनी) [काव्यशास्त्र], by Gaṅgānanda Kavīndra.

creative commons

## Attribution-NonCommercial-ShareAlike 3.0 Unported

### You are free:

**to Share** — to copy, distribute and transmit the work

**to Remix** — to adapt the work

### Under the following conditions:

**Attribution** — You must attribute the work in the manner specified by the author or licensor (but not in any way that suggests that they endorse you or your use of the work).

**Noncommercial** — You may not use this work for commercial purposes.

**Share Alike** — If you alter, transform, or build upon this work, you may distribute the resulting work only under the same or similar license to this one.

### With the understanding that:

**Waiver** — Any of the above conditions can be **waived** if you get permission from the copyright holder.

**Public Domain** — Where the work or any of its elements is in the **public domain** under applicable law, that status is in no way affected by the license.

**Other Rights** — In no way are any of the following rights affected by the license:

- Your fair dealing or **fair use** rights, or other applicable copyright exceptions and limitations;
- The author's **moral** rights;
- Rights other persons may have either in the work itself or in how the work is used, such as **publicity** or privacy rights.

**Notice** — For any reuse or distribution, you must make clear to others the license terms of this work. The best way to do this is with a link to this web page.

This is a human-readable summary of the Legal Code (the full license). Disclaimer